So[45] far as the Tamil country is concerned Reṇukā is worshipped as Marīyammana or Mārikā, the Goddess of small-pox. In temples dedicated to her, only the head of the deity is kept and this is explained by the story of Paraśurāma beheading his mother, at the behest of his father. Another story is also narrated to explain her worship as the Goddess of measles. As the great pativratā, Reṇukā entered the funeral pyre on the death of Jamadagni and just as her body was about to be burnt and had already become full of blisters, Indra quenched the fire with showers and Śiva ordained that she would be the village deity presiding over small-pox. The sources for these in Sanskrit Purāṇas are yet to be traced.

The laudatory descriptions of kings and dynasties, especially of Western India, confirm the popularity of the Paraśurāma-tradition in this part of the peninsula. The legend of Paraśurāma is incorporated not only in describing the martial exploit of kings but also in tracing the origin of dynasties. While referring to the origin of the Chalukyan feudatories of the 12th century, namely, the Bappura family or the Bali vaṁśa that ruled over Kisukāḍ an inscription[46] speak of its ancestors as born from the caverns (vala or bala) of Mount Kiṣkindhā[46a], in

---

45. I am thankful to Dr. V. Raghavan for giving me the information about the Reṇukā-legends prevalent in Tamil country.

46. *E. I.*, Vol. XV, 10 ff.

46a. For its identification, see p. 34, *Geography of Ancient and Medieval India*'. D.C. Sircar ; *Purāṇa*, Vol. IV, No. 2. (1962). *The Geographical text of the Purāṇas*', C.A. Lewis.

connection with Paraśurāma's visit to the place. The inscription apparently indicates that after Paraśurāma's extirpation of the Kṣatriyas, a new branch arose deriving their name from 'bala'[47].

The superb gold crown of Paraśurāma is mentioned in many inscriptions[48] of the 12th century. In the course of recounting the conquests of the Cola Rajendra II, it is said that he conquered Tiruvanchikkolam and seized the valuable crown of Paraśurāma, worthy of Lakṣmī. The fulsome account adds that when Paraśurāma bound the kings twenty-one times, he deposited the crown in the impregnable Śāndimat island. The location of the island, however, is not certain.[49]

The *Keralotpatti* and *Kerala-māhātmya* refer to the many social customs and everyday-practices that had originated from the magnetic personality of Paraśurāma. The Malabar brahmans honour him daily in their saṁkalpa referring to their country as Paraśurāmakṣetra. The extent of Paraśurāma's influence on Malabar and its people can also be gauged by their reckoning an era of Paraśurāma, dating from 1176 B. C.[50] That Paraśurāma's name is of hallowed memory is also evident in his being the favourite deity in the performance of some sacrifices.[51]

The popularity of Paraśurāma is also evident not only in the mass of legends and literature gathered round his domineering personality but also his being considered the author of some works like the *Tripuropāstipaddhati* or *Paraśurāma-kalpasūtra* and *Jāmadagnyadhanurveda.* Regarding the *Paraśurāma-kalpasūtra,* it is said[52] that Dattātreya at first composed the *Dattasaṁhitā* on Tripurā-worship in 18,000 verses. Paraśurāma abridged the above

---

47. L. D. Barnett, p. 108, *E.I.* Vol. XIV.
48. Pp. 87-88, *Mysore and Coorg*, B.L. Rice. *E. C.* Vol. X, Kolar 44 and 106 (a) ; *E.C.* Vol. III' Nañjaṅgūḍ 134 ; *S.I.I.* Vol. III, p. 28.
49. The island is variously referred to as Cāndimat and Jāndimat. B.A. Saletore (*op.cit.*, pp. 16-7) identifies it with the island Śānti mentioned in the *Tulu grāmapaddhati.*
50. P. 286, *Mysore Gazetteer* (Revised), Vol. I. B.L. Rice.
51. M.S. Parikh, pp. 28, 29, *Bhagavān Śrī Paraśurāma kā avatār kāry.*
52. Pp. 9-10, Inrroduction to the *Paraśurāmakalpasūtra.*

text of Dattātreya, composed it in 6,000 sutras in 50 sections and also simplified it, so that the difficult Śrī Vidyā might be within the reach of the common man. Later Sumedhā of Harita gotra, a pupil of Paraśurāma further simplified Paraśurāmā's version in ten khaṇḍas, in the form of a conversation between Paraśurāma and Dattātreya. The *Paraśurāmakalpasūtra*, available now, is considered to be the above version given by Sumedhā. It is noteworthy that the *Datta-Purāṇa*[52a] (IV, 8) of Vāsudevānandasarasvatī states that Paraśurāma came to the Āmalakī grāma in the Sahya mountain after donating the earth to Kāśyapa and became a disciple of Dattātreya. The Goddess Tripurā is identified in the *Datta-Purāṇa* with Reṇukā (śl. 32), at whose bidding Paraśurāma learns the vidyā from Dattātreya.

There are again some works having some bearing on the Paraśurāma-tradition like the three unpublished works, the *Paraśurāma-pratāpa*, *Bhārgavārcanadīpikā* and *Bhṛguvaṁśamahākāvya*, all of them written by Sābāji Pratāparāja (1500-1600 A. D.) a protege of Burhan Nizam Shah of Ahmadnagar.[53]

A further survey of inscriptions, local legends, literary works, sculptural representations and oral traditions of people in Western India may bring forth fresh material on this subject. But the picture of Paraśurāma presented to us even in the available material is somewhat dim and confusing. He is an avatāra of Viṣṇu, and at the same time a cirajīvin. He, therefore, belongs to the Tretāyuga, as well as to the present Kali age.[54] Though himself an avatāra, he heralds the greatness of Kṛṣṇa in the Dambodbhava episode of the *Mahābhārata* (Udyoga, 94) and is himself defeated in battle by another avatāra namely, Rāma Dāśarathi. Kṛṣṇa in the *Bhagavadgīta* refers to Paraśurāma

52a. *Vāsudevānandasarasvatīgranthamālā*, Nos. 6, 7.

53. P. K. Gode, pp. 156-64, *A. B. O. R. I.*, Vol. XXIV (1943). Also *Poona Orientalist*. VII (1942), pp. 1-26 for an analysis of the encyclopaedic *Paraśurāmapratāpa*. The first Kāṇḍa, namely the Pratāpa-kāṇḍa of the *Paraśurāmapratāpa* recounts the history of Paraśurāma.

54. *Kalki Purāṇa* (III, 1-5) refers to Kalki learning Śāstra and Śastra at the feet of Paraśurāma.

as one of His own glorious manifestations. Paraśurāma completely roots out all Kṣatriyas and at the same time is a king-maker. He is honoured not only in the Brahmanical society but also in the lower strata. He is himself a Brahmin with the qualities of a Kṣatriya, but is never in charge of any kingdom. His figure is that of a gigantic hero of martial splendour on one occasion and at another a peaceloving social reformer. Supposed to be an incarnation of Viṣṇu, he is as ardent disciple of Śiva. The paradoxical figure of Paraśurāma is as appalling as it is appealing. It is no wonder, therefore, that there have been varied conceptions or interpretations of Paraśurāma among modern scholars. According to some, the story of the quarrel between the Bhṛgus of Broach and the Haihayas recount the exploits of Paraśurāma supported by nāgas.[55] According to others, he is the leader of the Aryan civilisation.[56] Yet others regard him a leader of the tribe called Paraśurāma and that there were many Paraśurāmas in that family.[57] The possession of the crude axe by Paraśurāma is regarded by some as determining the age in which he lived as one less civilised.[58] Paraśurāma's encounter with Kārtavīrya is said to denote a time when the sacerdotal and royal class did not strictly adhere to their respective prerogatives.[59] The indissoluble association of Paraśurāma with the reclamation of the West Coast has been regarded by some as a myth that seeks to explain certain geographical and social phenomenon.[60]

---

55. The connection of Paraśurāma with the Nāgas is popular in legends. The Nāgāhvaya story in two chapters appended to the *Sahyādrikhaṇḍa* (Bombay ed. pp. 505-512) relates how Paraśurāma averted the fear of the Nāgas from Vainateya.

The temple of snakes at Mannārśāla in Haripād in Central Travancore, with Vāsuki and Sarpayakṣī as the main deities, is believed to have been established by Paraśurāma (*Hindu* dated 3rd May 1964). A large number of people, even in the present day, make offerings here on the day of Âyilyam star in the month of Tulam. There are several traditions regarding the sanctity of the place (T. K. Velu Pillai, *Travancore State Manual*. Vol. IV, p. 700).

56. *Kerala Studies*, p. 22, 24.

57. *Kerala Studies*, p. 11. P. 38, *Poona Orientalist*, Vol. XI (1946), R. D. Karmarkar.

58 M. S. Parikh, *op. cit.*, p. 10.

59. J. Muir, *Original Sanskrit Texts*, Vol. I, 442ff.

60. *Journal of Bombay University*, Vol. I, p. 116; *Journal of Rama Varma Bulletin*, Vol. XII (1945). p. 7.

It is evident, therefore, that it will be hazardous to try to define clearly the blurred figure of Paraśurāma seen through the maze of tradition. The history of the Bhārgavas in the Vedic, Epic, and Purāṇic literature can, however, supply some clues of ideas that were probably magnified in the imagination of the remote descendants of a powerful ancient clan, influenced strongly by the cult of ancestor-worship.

The Bhṛgus or Bhārgavas are an ancient and powerful family, occuring frequently in the *Ṛg-Veda*. They are intimately connected with the production of fire and the performance of Soma-saccrifice. Bhṛgavāṇa[61] occurs once probably as an epithet of Agni, because of this connection of the Bhṛgu family with fire. The Bhṛgus appear to have been the first to bring fire from heaven for the use of mankind.[62] This may probably explain the part played by fire in the stories of Bhārgavas like Aurva as also the very name Jamadagni. It is also an indication of the prerogative and position enjoyed by the Bhṛgus.

The Saṁhitās represent the Bhṛgus not only as priests but also as historical characters with inclinations for fighting. Thus in *ṚV*. VII. 18, 5ff., the Bhṛgus figure in the confederacy of Ten Kings, Simyu, Turvaśa, Druhyu, Kavaṣa, Pūru, Ānava, Bheda, Śambara, and the two sons of Vikarṇa, to fight against Sudāsa, the king of the Tṛtsavas.[53]

पुरोळा इत्तुर्वशो यक्षुरासीद्राये मत्स्यासो निशिता अपीव ।
श्रुष्टिं चक्रुर्भृगवो द्रुह्यवश्च सखा सखायमतरद्विषूचोः ॥

*ṚV*. VII. 18. 6.

Sāyaṇa explains it as:

अपि भृगवः द्रुह्यवश्च योधाश्च सुदासः तुर्वशस्य च श्रुष्टिम् आशुप्राप्तिं चक्रुः । यद्वार्यक्षु यज्ञशीलः पुरोळाः पुरो दाता × × × अपि च भृगवो द्रुह्यवश्च श्रुष्टिं सुखं तुर्वशस्य चक्रुः ।

61. *Vedic Index*, Vol. II, p. 101.
62. J. Muir, *op. cit.*, p. 443.
H. Oldenburg, *Die Religion Des Veda*, 122ff.
63. E. W. Hopkins, *J. A. O. S.* Vol. 15, pp. 261-5.

Sudāsa supported by Indra fought against the Ten kings and gained a victory over them. The two sons of Vikarṇa who fought against Sudāsa, had along with them the tribes of not only the above-mentioned Ten kings but also some others, making a total of twenty-one tribes.

एकं च यो विंशतिं च श्रवस्या वैकर्णयोर्जनान् राजा न्यस्तः ।
दस्मो न सद्मन्नि शिशाति बर्हिः शूरः सर्गमकृणोदिन्द्र एषाम् ॥
*RV*. VII. 18. 11.

It is perhaps an accidental coincidence that the above hymn refers to the number of tribes against whom Indra fought as twentyone a number that is indissolubly connected with Paraśurāma in later times.

On another occasion, (*ṚV*. IX. 101, 13), the Bhṛgus are referred to, as fighting against a demon called Makha.

प्र सुन्वानस्यान्धसो मर्तो न वृत तद्वचः ।
अप श्वानमराधसं हता मखं न भृगवः ॥

Sāyaṇa says here :—सुन्वानस्य × × × तत्र दृष्टान्तः । मखं न । यथा पुरापराद्धं मखमेतन्नामानं भृगवः अपहतवन्तः तथापहतेत्यर्थः ।

In the *Atharva Veda* (V. 18. 10-11 ; V. 19. 1-11) there is a curious anecdote that narrates the irretrievable ruin of Sṛñjaya Vaitahavyas when they slaughtered the cow of the Bhṛgu.[64]

ये सहस्रमराजन्नासन् दशशता उत ।
ते ब्राह्मणस्य गां जग्ध्वा वैतहव्याः पराभवन् ॥
गौरेव तान्हन्यमाना वैतहव्याँ अवातिरत् ।
ये केसरप्राबन्धायाश्चरमाजामपेचिरन् ॥
× × +
अतिमात्रमवर्धन्त नोदिव दिवमस्पृशन् ।
भृगुं हिंसित्वा सृञ्जया वैतहव्याः पराभवन् ॥

64. M. Bloomfield, S. B. E., Vol. 42, pp. 433-4.

The *Brahmāṇḍa-Purāṇa* (III. 47. 65-67) refers to the following descendants of Kārtavīrya :—

Kārtavīrya—his fifth son Jayadhvaja—his son Tālajaṅgha —his hundred sons also called Tālajaṅghas, the eldest of whom was Vītahavya. The *Mahābhārata* (XIII. 30) also refers to the Vaitahavyas as belonging to the Haihaya stock. Some scholars[65] have therefore connected the legend in the *Atharva Veda* with that occurring in the epics and Purāṇas, and also identified the Kesaraprābandhā[65a] of the Atharva hymn with Reṇukā.

From the later stories about the Bhārgavas, it would appear that they were a Brahmin clan, perhaps more intimately connected with the ruling class than most of the other clans. They entered into matrimonial ties with Kṣatriya ladies. Thus Cyavana is married to Sukanyā, the daughter of King Śaryāti, Ṛcīka to Satyavatī, daughter of Kānyakubja and sister of Viśvāmitra and Paraśurāma's father, Jamadagni, to Reṇukā, daugther of Reṇu[66] of the Ikṣvāku family. The royal connections of the Bhārgavas for successive generations from Cyavana to Paraśurāma not only renders the activities of Paraśurāma against the Kṣatriyas look more natural but also reveal the reformist tendency of the Bhārgavas even in the remote past. The routing of the whole Kṣatriya race by Paraśurāma may have been the exaggeration of bards and the fulsome account is to be explained probably by the uniqueness of a Brahman wielding a weapon. But there is some justification in connecting Paraśurāma with the routing of Kṣatriyas ; for Sagara who came seven generations after Paraśurāma and who was helped by the Bhārgavas, did entirely rout out not only the Haihayas who comprised the five prominent groups, the Vītihotras or Vītahavyas, Śaryātas, Bhojas, Avantis and Tuṇḍikeras, but also the Śakas, Yavanas, Kāmbhojas, Pāradas and Pahlavas from North West. Sagara of Ayodhyā was born and

---

65. *Encyclopaedia of Religion and Ethics*, Vol. II, pp. 558-60.

65a. There is no certainty about the meaning of *Kesaraprābandhā*. Lüdwing took it as the name of a cow. See *S. B. E.* Vol. 42, p. 433.

66. In some accounts, however, Reṇukā is considered the daughter of Prasenajit of Ayodhyā.

educated in the Bhārgava Aurva's hermitage and also given Paraśurāma's fire weapon with which he devastated the Kṣatriyas. Paraśurāma, probably checked the territorial expansion of the Haihayas in the initial stage and his work was completed by Sagara with the help of the Bhārgavas.[67]

A significant effect of the supposed extirpation by Paraśurāma however lies in the history of the social order of the day. For, the ruling and priestly classes had then the necessity to intermingle for the sake of progeny.

तदा निःक्षत्रिये लोके भार्गवेण कृते सति ।
ब्राह्मणान्क्षत्रियाः राजन्सुतार्थिन्योऽभिचक्रमुः ॥
तेभ्यश्च लेभिरे गर्भं क्षत्रियास्तास्सहस्रशः ।
ततस्सुषुविरे राजन्क्षत्रियान्वीरवत्तरान् ॥
एवं तद्ब्राह्मणैः क्षत्रं क्षत्रियासु तपस्विभिः ।
जातमृध्यत धर्मेण सुदीर्घेणायुषान्वितम् ॥
चत्वारोऽपि ततो वर्णाः बभूवुर्ब्राह्मणोत्तराः[68] ।

Mahābhārata, Ādi Parva, 58, 5-8.

In the later Paraśurāma-legends prevalent along the West Coast we find Paraśurāma not only inculcating martial spirit in the people of the newly-created area by erecting many institutes for the practice of arms but also creating new conditions of social life there. Paraśurāma, herein, invites Brahmans from outside to people the new country and also confers Brahmanhood on the local people of lower castes.

The anicent Bhṛgus were craftsmen noted for their dexterous artistic creations, as evident in the references[69] to their chariot-building. On the basis of the above references, Bhṛgu is considered synonymous with a handicraftsman.[70] The *Mahā*

67. F. E. Pargiter, *Ancient Indian Historical Tradition*, p. 271.

68. *cf. Sahyādrikhaṇḍa* (Bombay 1877), p. 128, śls. 5-9.

69. *RV.* IV. 16, 20 and X. 39. 14.

70. Dr. Hermann Weller, *A.B.O.R.I.*, Vol. XVII (1937), p. 299. *Encyclopaedia of Religion and Ethics*, Vol. II, p. 558.

*bhārata*[71] (Ādi, 190.47 and 191.1) uses the term 'Bhārgava' in the sense of a potter. The same Epic in a later context[72] narrates the unique account of our indebtedness to Jamadagni for the origin of sandals and umbrelas.

Bhṛgu is a typical name for an Atharvan priest and Bhṛgvaṅgiras is a name of the *Atharva-veda* itself[73]. The *Mahābhārata* and the Purāṇas also relate many accounts of the Bhārgavas' skill in occult practices, for example the knowledge of the Sañjīvanī vidyā (reviving the dead) possessed by all Bhārgavas, and Cyavana paralysing Indra. Cyavana is associated in medicine with an elixir. Yāska[74] also regards the Bhṛgus as semi-mythical beings moving in mid-air. Dharma and politics too were their special subjects of study and *Manu Smṛti* is referred to by the other name of *Bhṛgu Saṁhitā.*[75] Bhṛgu is also one of the authors on the art of buildings[76] (Vāstuśilpa). In fact, there is no subject on Art or Science that the Bhṛgus were not associated with.

The Bhārgavas, according to the Purāṇas, are a tribe belonging to the West Coast.

ब्रह्मोत्तराः प्रविजया भार्गवा ज्ञेयमार्द्काः ।

Śūrpāraka[77] (modern Sopāra) and Bhṛgukaccha (modern Broach), the marine stations along the West Coast are connected with Paraśurāma since the age of the *Mahābhārata* and the Purāṇas. The Mahendra mountain mentioned on several occasions in the *Mahābhārata* and the Purāṇas as the place where Paraśurāma is said to have engaged in austerities is supposed to be,

---

71. ब्राह्मणैः प्राविशत्तत्र विष्णुर्भार्गववेश्म तत् ।
गत्वा तु तां भार्गवकर्मशालां पार्थौ पृथां प्राप्य महानुभावौ ।
The *Bhāvapradīpa* of Nīlakaṇṭha says on the above : भार्गवः कुलालः

72. Anuśāsana, chapter 95.

73. M. Bloomfield, *op. cit.*, p. XXXIII.

74. *Nirukta*, XI. 19.

75. Sukthankar, *op. cit.*, pp. 73-74.

76. A. P. Karmakar, *A.B.O.R.I.* Vol. XX (1938-39), p. 22.

77. Araṇyaka, 86, 9 connects Śūrpāraka with Jamadagni himself :
वेदी शूर्पारके तात जमदग्नेर्महात्मनः ।

by some authorities,[78] the southernmost spur of the Travancore hills, a few miles from Nagercoil. Amongst the early Bhārgavas, Cyavana, entering into matrimonial ties with the royal family at Anarta, is connected with the West. *Todarānanda* (Avatāra-saukhya, Paraśurāmāvatāra, śls. 109-11) refers to Jamadagni and Ṛcīka as belonging to the region near Godāvarī and adds that the river, out of fear for Ṛcīka, branched into two streams.

भार्गवाविति जानीहि पुण्याद्गोदावरीतटात् ।
आगताविह राजर्षे दर्शनार्थं तवानघ ॥
अयं मे जनको राजन्नृचीको नाम नामतः ।
[79]यस्य शापभयाद्भीता द्विधा गोदावरी बभौ ॥

The Bhārgavas, appear to have occupied a key position near the Narmadā and there are no clear evidences to show when they moved further south. With their artistic and literary achievements they seem to have contributed considerably to civilisation. The *Brahmāṇḍa-Purāṇa* (III. 24) recounts the victory that Paraśurāma gained over the Daityas. Paraśurāma is honoured even to this day in the Elnād[80] or the Sapta Drāviḍa

---

78. M. A. Saletore, *op., cit.*, pp. 24-25.
F. E. Pargiter regards the Mahendra mountain of the *Rāmāyaṇa* as distinct from the range of the same name in the Purāṇas and says that the first is the Tinnevelli hills and the second is on the eastern India near Ganjam (pp. 97-9, *Studies in Indian antiquities*, Dr. Hemachandra Roy Choudhri).
The *Vādeśvarodaya kāvya* locates the Mahendra mountain, one yojan to the west of the Sahya mountain on the banks of the river Jagat-pāvanikā and refers to the tradition that Paraśurāma named it Mahendra on account of its similarity with its namesake on the East, (A. D. Pusalker, *op. cit.*, pp. 68-9).

79. *Cf. Sahyādri khaṇḍa* of the *Skānda Purāṇa* (Bombay, 1877), p. 403.

गौतम्यां कोटितीर्थे तु ऋचीकस्याश्रमः शुभः ।
ऋचीकः स तपस्तेपे सहितो जमदग्निना ॥
ऋचीकस्य भयाद्यत्र द्विधा गोदावरी बभौ ।
तत्र स्नानं च दानञ्च ह्यक्षयं च नृणां भवेत् ॥

*Reṇukāmāhātmya*, chapter 8., Śls. 4, 5.

80. P. 719, *Indian Culture*, Vol. III (1936-37), "*Mohenjodaro, the people and the land*" Rev. H. Heras, S. J.

Koṅkaṇa of the Purāṇas and Reṇukā or the Dravidian deity Ellammā is still worshipped by thousands of people in the province. It can be mentioned here that the story in early literature about Paraśurāma and his killing Reṇukā has taken a different turn in later legends. It is said (Taylor, III, p. 210) that after killing his mother Paraśurāma asked Jamadagni, the boon of reviving Reṇukā. Jamadagni accordingly instructed Paraśurāma to unite the head and body of Reṇukā in a particular manner. In the confusion of the moment, Paraśurāma applied the head of an outcaste woman to the lifeless body of Reṇukā. Thenceforward, the outcastes are said to regard Reṇukā as their divinity. The *Sahyādrikhaṇḍa*, *Datta Purāṇa* and *Todarānanda* glorify Reṇukā in diverse manner. In fact, Paraśurāma and Reṇukā are considered with equal regard in later legends.[81]

The popularity of Paraśurāma, as the most prominent representative of the glorious Bhārgava tradition is evident not only in the honoured place as an *avatāra* assigned to him in the Hindu pantheon but also in his being recognised as an immortal. Purāṇas like the *Bhāgavata* and *Brahmāṇḍa* describe him as an *avatāra* and a *cirajīvin*. Paraśurāma is also mentioned among the sages who would be occupying a notable position in the Sāvarṇa manvantara, which is to follow the present Vaivasvata manvantara.

सावर्णस्य प्रवक्ष्यामि मनोर्वैवस्वतस्य ह ।
भविष्यस्य भविष्यन्ति समासात्तान्निबोधत ॥

81. In the *Sahyādrikhaṇḍa*, *Reṇukā Māhātmya* (37 chapter), Paraśurāma insists on Reṇukā to stay with him in the Sahya mountain, and she too accedes to his request.

न हि शक्ष्यामि मातस्त्वदृते वस्तुमुत्तमे ।
अस्मिन्सह्याचले रम्ये शोभितेऽपि सुरर्षिभिः ॥
सर्वतीर्थैः सुरैः सर्वैर्मुनीन्द्रैः सिद्धकिन्नरैः ।
सहितात्रैव विश्रामं करिष्यामि न संशयः ॥

The purely South Indian tradition connecting Paraśurāma and Reṇukā with the origin of the lower strata of society is supposed to have known even to Goethe. (Dr. Jarl Charpentier, *Mm. Kuppusvāmi Śāstri Commemoration Volume.* 11fn.)

अनागताश्च सप्तैव स्मृतास्त्विह महर्षयः ।
कौशिको गालवश्चैव जामदग्न्यश्च भार्गवः ॥

Vāyu, 100. 9-10.

भविष्यसि महर्षिस्त्वं नूनं सावर्णिकेऽन्तरे ।
ततः प्राप्ते महाकाले मत्सायुज्यं गमिष्यसि ॥

Datta Purāṇa, IV. 8. 17.

Even in the present time, the shades of Paraśurāma could be seen in the martial traits of the Maharastrians, in the matriarchal bias of Kerala and the Aliya-santāna (inheritance through nephews) of Tulu, in all of which areas, Reṇukā is prominently deified,[82] and the unique temple of Paraśu in Hiremagaḷūr in Mysore is a symbol of the vogue of Paraśu-Rāma's worship in this region.

82. In Koṅkaṇa, she bears the *alias* Kuṅkaṇā.

# श्रीनारदपुराणम्

## अनन्तशास्त्री फडके

[ In this article the learned author has dealt with the various aspects of the Nārada-Purāṇa. In the beginning of the article he has tried to establish that the Purāṇa is the most ancient literature from which even the Veda sprang. Originally the Purāṇa was the only literature on the basis of which all religious and social rites were performed. Later on it was also used as the dharmaśāstra, arthaśāstra, nītiśāstra etc. According to the author, in Kṛtayuga only the Purāṇa existed, in Dvāpara the Vedas and the Purāṇas, and in the middle of Dvāpara were the Vedas, the Purāṇas and the other Śāstras. At the end of the Dvāpara Vyāsa codified the Vedas and the Purāṇas ; and after him the *Sūtas*, the narrators of the Purāṇas, played an important role in the evolution of the Purāṇas.

After discussing the origin and the development of the Purāṇa and other allied literature the writer has discussed the problem of the Nāradīya Purāṇa. Dr. Wilson was of the opinion that neither the present Nārada Purāṇa nor the Bṛhannāradīya Purāṇa is the real Nārada-Purāṇa. But here the author has proved the authenticity of the Bṛhannāradīya Purāṇa and proved it as the real Purāṇa. The Nārada-Purāṇa published from Moradabad consists of 42 chapters. The other one published from Veṅk., bears the name Bṛhnnāradīya Purāṇa and consists of two parts, the first part of 125 chapters and the second part of 82 chapters. The first 41 chapters of both the Purāṇas are the same. 50 verses of the 42nd ch. of Nā. Purāṇa tally with ch. 125 of Part I of the

Bṛh. N. P. and the remaining 31 verses of ch. 42 are the same as the last 31 verses of ch. 82 of the Part II of Br. N. Purāṇa. Thus all the Ślokas of the Nārada P. are available in the Bṛhan-Nāradīya.

The author has also given some useful details of the interlocutions of the Bṛhan-Nāradīya Purāṇa, and also has briefly dealt with the subject-matter of this Purāṇa, specially the contents of the 18 Mahā-purāṇas given in the Bṛhannāradīya.]

श्रीनारदपुराणस्य स्वरूप-समयनिर्धारण-महत्त्व-इतरपुराणतो वैशिष्ट्यादिविवेचनात्पूर्वं संक्षेपेण सर्वसामान्यं पुराणविषयकविवेचनं कर्तुमुचितं प्रतिभाति ।

प्रायः सर्वपुराणेषु पुराणप्रादुर्भावसमय-स्वरूपनिर्णय-क्रमशोवर्धनप्रकारादिकं समुपलभ्यते, परन्तु विद्वद्भिस्तद्विशेषतोऽद्य यावन्नालोचितमिति सखेदं कथ्यते ।

प्राचीनभारतीयवैदिकवाङ्मयतः पूर्वं पुराणप्रादुर्भावोऽजायत । ततो वेदास्ततः सर्वशास्त्राणि च—

पुराणं सर्वशास्त्राणां प्रथमं ब्रह्मणा स्मृतम् ।
अनन्तरं च वक्त्रेभ्यो वेदास्तस्य विनिर्गताः ॥ मत्स्य ५३

वैदिक-सर्वशास्त्रप्रादुर्भावात्पूर्वं पुराणस्य प्रादुर्भावः, अनन्तरं च वेदाः । ततः सर्वशास्त्राणि । अयं क्रमः प्रायः सर्वत्रोपलभ्यते । परमतिप्राचीने काले पुराणेनैकेनैव मानवानां त्रिवर्गसिद्धिः समपद्यत, तच्च तदा शतकोटिपरिमितमासीदेतदपि प्रायः पुराणे सर्वत्र समुपलभ्यते—

पुराणमेकमेवासीत्तदा कल्पान्तरेऽनघ ।
त्रिवर्गसाधनं पुण्यं शतकोटिप्रविस्तरम् ॥ मत्स्य ५३
तथा रेवामा० १।२३।३०

तस्मिन्नतिप्राचीने काले वैदिकमन्त्रसाध्यधार्मिकाः सर्वाः क्रियास्तथार्थशास्त्रप्रभृतीनि सर्वाणि शास्त्राणि धर्मकाममोक्षसाधकानि पुराणद्वारैव संपाद्यन्ते स्म । प्रत्युत तदा पुराणपदेनैव संप्रति भिन्नानां वेद-शास्त्र-तन्त्र-कलादिबोध्यानां ग्रन्थानां व्यवहारो

जायते स्म । एतत्सर्वं पुराणमेकमेव पदसमुदायेन, त्रिवर्गसाधनपदेन च बोध्यते । तच्चातिविस्तृतत्वाद् नियतगणनारहितत्त्वाच्च शतकोटिप्रविस्तरमिति कथितम् । न तु तत्र गणनायामावश्यकं श्लोकादिकमुक्तम् । किन्तु केवलं संख्या शतकोटीत्युक्ता, सांप्रतिकैरस्माभिः सांप्रतिककल्पनानुसारं श्लोकपदमध्याहृत्यार्थः क्रियते । ततस्तस्मिन्काले विगते तत एव पुराणपदवाच्याच्छतकोटिसङ्ख्याकग्रन्थराशेर्ब्रह्मणा वेदा आविर्भूताः ततः शास्त्राणि च । ब्रह्मणा ये सृष्टा मन्त्रराशयस्ते केवलं वेदपदबोध्या एव न तु ऋगादिरूपनामसंयुक्ताः, अत एव द्वापरान्ते नारायणस्वरूपव्यासेनैकवेदस्य ऋगादिरूपेण कृताः विभागाः संगच्छन्ते ।[1]

ऋगादिवेदेषु बहुत्रानेकदेवता-गन्धर्वाप्सरस्-आयुर्वेदीयानेकौषधि-रोगादिनिवारकमणिमन्त्रादियुद्धोपयोगिकवचशस्त्रादि-गृहस्थितपदार्थ-वस्त्राभूषण-व्यापार-परिमाण-नगरग्रामादिका अनेके विषयाः प्रसङ्गतः समागतास्तेषां विस्तार-स्वरूप-निर्माण-वृद्ध्यादिकमबोधकाः ग्रन्था वेदादितः पूर्वं स्युरिति निश्चयेन वक्तुं शक्यते, कदाचित्ते लिपिबद्धा न भवेयुः परन्तु गुरुशिष्यपरम्परया संभवेयुः, अन्यथैकजातीयपरस्परभेदसिद्धपदार्थवर्णनं कथं संगच्छेत । उपलब्धानेकसजातीयपरस्परभेदवर्णनपराः ग्रन्थास्तदा पुराणरूपैकमहति ग्रन्थे अन्तर्भूताः स्युरतः पुराणानामेकं लक्षणं "पुरा परम्परां वक्ति पुराणं तेन वै स्मृतम्" इत्यप्युपलभ्यते । अतो वेदानां प्रादुर्भावादनन्तरं तत्तद्विषयबोधकानि शास्त्राणि पुराणत एव प्रादुर्भूतानीति कल्पनोचिता प्रतिभाति । अत एव "प्रवृत्तिः सर्वशास्त्राणां पुराणादभवत्ततः ।" ( ना० पु० ९२।२३ ) उक्तं संगच्छते । एवं च त्रिवर्गसाधकपुराणरूपैकग्रन्थराशेर्वेदानां सर्वशास्त्राणां च प्रादुर्भावोऽभवत् । त्रिवर्गसाधनं-धर्मकाममोक्षरूपत्रिवर्गस्य साधकम् । अतिपरमप्राचीने काले वेदशास्त्रादिप्रादुर्भावात्पूर्वं पुराणमेकमेवासीत् । स च कालो वायु-विष्णु-मार्कण्डेयपुराणादिषु वर्णित उपलभ्यते । यथा—

धर्माधर्मौ न वा चास्तां निर्विशेषाः प्रजाः तु ताः ।
तुल्यमायुः सुखं रूपं तासां तस्मिन् कृते युगे ॥
पृथ्वीरसोद्भवं नाम आहारं ह्याहरन्ति वै ।
ताः प्रजाः कामचारिण्यो मानसीं सिद्धिमास्थिताः ॥

---

१—व्यदधाद्यज्ञसन्तत्यै वेदमेकं चतुर्विधम् ।
ऋग्यजुःसामाथर्वाख्या वेदाश्चत्वार उद्धृताः ॥ भाग० १।४।१९-२० ।

पर्वतोदधिसेविन्यो ह्यनिकेताश्रयास्तु ताः ।
विशोकाः सत्त्वबहुला एकान्तसुखिताः प्रजाः ॥
तदा सत्यमलोभश्च क्षमा तुष्टिः सुखं दमः ।
अबुद्धिपूर्वकं वृत्तं प्रजानां जायते स्वयम् ॥
अप्रवृत्तिः कृतयुगे कर्मणो शुभपापयोः ।
वर्णाश्रमव्यवस्थाश्च न तदासन् न संकरः ॥
तासां विशुद्धसंकल्पाज्जायन्ते मिथुनाः प्रजाः ।
सुखप्राया ह्यशोकाश्च उत्पद्यन्ते कृते युगे ॥
ध्यानं परं कृतयुगे त्रेतायां ज्ञानमुच्यते ।
द्वापरे यज्ञमेवाहुः··· · · · ॥ वायु ८।४७-६४

सर्वप्राणिजातसुखकारकस्य कृतयुगीयकालस्य वर्णनं दृष्ट्वा स्वाभाविक्येव तात्कालिकप्रजानां धर्मे, कामे, मोक्षे च प्रवृत्तिरासीदत एवायं धर्मोऽयमधर्म इति विभेदस्यावश्यकता नासीदेव । इदं च "धर्माधर्मौ न तास्वास्ताम्" इत्यनेन बोधितम् । स्वाभाविकं धर्माचरणं च "तासां सत्यमलोभश्च" "अबुद्धिपूर्वकं वृत्तम्" इत्यनेन स्फुटीकृतम् । कामार्थमर्थरूपद्वितीयपुरुषार्थस्यापेक्षा नासीदेव । तच्च "पृथ्वीरसोद्भवं नाम" इत्यादिवर्णनेन बोधितम् । "विशोकाः सत्त्वबहुलाः" "एकान्तसुखिताः" इत्यनेन मोक्षरूपपुरुषार्थप्राप्तिः सूचिता । "तासां विशुद्ध-संस्काराज्जायन्ते मिथुनाः" इत्यनेन विशुद्धकामपुरुषार्थवत्वं प्रदर्शितम् ।

"वर्णाश्रमव्यवस्थाश्च न तदासन्" इत्यनेन वर्णाश्रमाद्यवलम्ब्य प्रवृत्तवेदादिकानां तदाऽभाव एव स्पष्टं प्रतिपादितः । एवं च धर्म-काम-मोक्षाणां स्वभावतः एव संपादकः सोऽतिपरमप्राचीनः कृतयुगरूपकालः पुराणमात्र-निर्दिष्ट आसीत् । तत्र केवलं पुराणस्यैव प्रादुर्भावस्तदासीत् "पुराणमेकमेवासीत्" "त्रिवर्गसाधकं पुण्यम्" इत्यनेन बोधितम् । एवं पुराणादिप्रादुर्भावक्रम इत्थं बोधयितुं शक्यते—

(१) कृतयुगम्, ब्रह्मा, पुराणमेकमेव, धर्मकाममोक्षाः पुरुषार्थाः ।
(२) द्वापरः ,, वेदाः पुराणं च, धर्मार्थकाममोक्षाः पुरुषार्थाः ।
(३) द्वापरमध्ये ,, वेदाः पुराणं शास्त्राणि च, ,, ,,

तदात्वे पुराणाद्वेदादिप्रादुर्भावादनन्तरमपि पुराणमेकमेव, अतो वेदे पुराणशब्द एकवचनमात्र एवोपलभ्यते। यथा—"ऋचः सामानि च्छन्दांसि पुराणं यजुषा सह। उच्छिष्टाज्जज्ञिरे" ( अथर्वसं० ११।७।२४ ) "स बृहतीं दिशमनुव्यचलत्। तमितिहासः पुराणं च" (अथर्वसं० १५।६ ) एवं गोप. ब्रा. पू. भा. प्र. २ शतप.ब्रा. ११।४।७-९; १३।४।३१३, बृहदा. २।४।११ छान्दो० ७।१।२ इत्यादिषु पुराणादिकस्य वाङ्मयरूपेणैकवचनान्तेन च समुल्लेखो दृश्यते। स तृतीयकालिकस्थितिबोधकः। अत एव "ऋचः सामानि च्छन्दांसि" इत्यथर्वमन्त्रे "उच्छिष्टाज्जज्ञिरे" इति पदं सार्थकं भवति। प्रथमत एकपुराणरूपात्प्रादुर्भूतो वेदरूपमन्त्रराशिरुच्छिष्टं तस्माच्च पुनर्यज्ञसंतत्यै द्वापरान्ते व्यासदेवद्वारा ऋचां साम्नां छन्दसां यजुषां च प्रतिभिन्नानां प्रादुर्भूतानामनन्तरमवशिष्ट एको राशिः पुराणरूप एवाख्यानादिसहितः स्थितः। ततो व्यासदेवेन वेदविभागकरणादनन्तरमाख्यानादिभिर्विशिष्टाः पुराणसंहिताः कृताः—

आख्यानैश्चाप्युपाख्यानैर्गाथाभिः कल्पशुद्धिभिः।[1]
पुराणसंहिताश्चक्रे पुराणार्थविशारदः॥ विष्णु० ३।६।१५

तदात्वे व्यासकृताष्टादशपुराणसंहितानामितिहासस्य जयनामकस्य च पृथक् स्वरूपं लक्षणं च यथार्थमासीत्। इतिहासस्याख्यानगाथादिभिरमिश्रितत्त्वात्। यथा शुक्रनीतौ—

प्राग्वृत्तकथनं चैकं राजकृत्यमिषादितः।
यस्मिन्स इतिहासः स्यात्पुरावृत्तः स एव हि॥

पुराणलक्षणम्—सर्गश्च प्रतिसर्गश्च वंशो मन्वन्तराणि च।
वंशानुचरितं चैव पुराणं तत्प्रकीर्तितम्॥ शुक्रनी० ४।३।५१-५२

एवं च पुराणेतिहासयोः स्वरूपं तदा परस्परभिन्नं विस्पष्टमासीत्। परन्तु व्यासेन वैशंपायनं प्रति प्रोक्तं चतुर्विंशतिसहस्रश्लोकात्मकं भारतं यथाऽऽख्यानादि-

---

( १ ) अत्र विष्णुपुराणे टीकायां श्रीधरस्वामिभिराख्यानादिकानां स्वरूपमुक्तम्—
स्वयं दृष्टार्थकथनं प्राहुराख्यानकं बुधाः।
श्रुतस्यार्थस्य कथनमुपाख्यानं प्रचक्षते॥
गाथास्तु पितृपृथिवीप्रभृतिगीतयः।
कल्पशुद्धिः श्राद्धकल्पादिनिर्णयः॥ इति

भिरेकलक्षश्लोकात्मकं सूतेन संपादितम्[1] तथा श्रीमता व्यासदेवेनापि मूलैकपुराणाद् वेद-शास्त्रप्रादुर्भावादनन्तरं यदवशिष्टं यत्पुराणं तस्य वृद्धिस्तत्कालप्रचलितैराख्या-नादिभिः कृता—

आख्यानैश्चाप्युपाख्यानैर्गाथाभिः कल्पशुद्धिभिः ।
पुराणसंहिता(तां)श्च चक्रे पुराणार्थविशारदः ॥ विष्णुः ३, ६, १५

तथैव भविष्यपुराणेऽपि पुराणानि सर्वाणि मिलित्वा द्वादशसहस्रश्लोकात्म-कान्यासन् । परन्तु आख्यानादिभिर्वृद्धिं गतानीति प्रतिपादितम्—

सर्वाण्येव पुराणानि संज्ञेयानि नरर्षभ ।
द्वादशैव सहस्राणि प्रोक्तानीह मनीषिभिः ॥
पुनर्वृद्धिं गतानीह आख्यानैर्विविधैर्नृप ॥

भवि-पु० ब्रह्मपर्व अ० १, १०४-१०५

एवं च संप्रति इतिहासपुराणयोर्विस्पष्टं स्वरूपं नोपलभ्यते, उभयोराख्या-नादिभिर्मिलितत्वेन समानरूपेण विद्यमानत्वात् ।

एवं च व्यासदेवेन पूर्वस्थितं पुराणमवलम्ब्याख्यानादिभिः सभेदं पुराणवृद्धि-करणं संपादितम् । व्यासदेवेन याः पुराणसंहिताः कृतास्तासां स्वरूपं नामानि च कानीति विषये किंचित् वक्तुं शक्यते । समुपलब्धैराख्यानादिभिः पुराणवर्धनं सम्पादयन्ति स्मेति वक्तुं शक्यते यतः—

शौनकाद्यास्तु ऋषयो ज्ञात्वा भूपस्य स्वर्गतिम् ।
गत्वा सूतं प्रणम्योचुर्धर्मं मुख्यं वदाधुना ॥
तेभ्यः सूतः पुराणानि श्रावयामास वै पुनः ॥

भवि० प्रतिसर्ग० खं० २ अ० २३

अत्र भूपस्य स्वर्गतिम् नाम विक्रमादित्यमरणम् । ज्ञात्वा शौनकादिभिः पूर्वश्रुतान्यपि पुराणानि पुनः सूतः तान् श्रावयामास । एतेनेत्थं प्रतिभाति

(१) इदं शतसहस्रं तु लोकानां पुण्यकर्मणाम् ।
उपाख्यानैः सह ज्ञेयमाद्यं भारतमुत्तमम् ॥
चतुर्विंशतीसाहस्रीं चक्रे भारतसंहिताम् ।
उपाख्यानैर्विना तावद् भारतं प्रोच्यते बुधैः ॥

आदिप० १।१०१-१०३

व्यासोक्तपुराणानि सूतेनाख्यानादिभिर्वृद्धिं नीतानि, स शौनकादीन् पुनः श्रावयामास। नोचेच्छ्रुतानां पुनः श्रवणं नोपपद्यते। किञ्च "सर्वाण्येव पुराणानि०" "द्वादशैव सहस्राणि०" "पुनर्वृद्धिं गतानीह आख्यानै०" इत्यादिपूर्वप्रदर्शितभविष्यपुराणोक्तवचनैर्व्यासदेवकृतपुराणानां स्वरूपं द्वादशसहस्रश्लोकात्मकमेवासीत्। व्यासोक्तानि पुराणानि तान्यवलम्ब्य सपादचतुर्लक्षश्लोकात्मकं वाङ्मयं सूतादिभिर्निर्मितम्। व्यासोक्तानि पुराणानि संभवतो व्यासोत्तरकाले आदिपुराणपदवाच्यानि भवेयुर्यतोऽनेकत्र पुराणेषु आदिपुराणानां समुल्लेखो दृश्यते। यथा—

हरिवंशे भविष्यपर्वप्रारम्भे ह्युक्तम्—

श्रृणुष्वादिपुराणेषु वेदेभ्यश्च यथा श्रुतम्।··· ॥

तथा

श्रृणुष्वादिपुराणेषु देवेभ्यश्च यथाश्रुतम् ॥ पद्मपु० १।३९।११

तथा— श्रृणुष्वावहितो भूत्वा कथामेतां पुरातनीम्।
प्रोक्तां ह्यादिपुराणेषु ब्रह्मणाव्यक्तमूर्तिना ॥ वामन० १।२०

एवं च व्यासोक्तपुराणानां सूतोक्तपुराणेष्वन्तर्लीनत्वात्सूतस्थितिकाले सूतेनाख्यानादिभिस्तत्कालोपलब्धैः पुराणसंस्कारकरणात्पूर्वं तानि व्यासोक्तान्यादिपुराणपदबोध्यानि भवेयुरिति वक्तुं शक्यते। तथा च पुराणानुक्रमकालाद्येवं वर्णयितुं शक्यते—

( १ ) कृतयुगम् ब्रह्मा पुराणमेव धर्मकाममोक्षसाधकं शतकोटिप्रविस्तरम्।

( २ ) द्वापरः ,, पुराणं वेदाश्च धर्मादिचतुर्विधपुरुषार्थाः।

( ३ ) द्वापरमध्यः ,, वेदाः, शास्त्राणि, पुराणं च ,,

( ४ ) द्वापरान्तः कलिप्रारम्भः, वेदव्यासः वेदः शास्त्राणि, पुराणसंहिता आदिपुराणपदवाच्याः पुरुषार्थचतुष्टयसाधिकाः।

( ५ ) कलौ व्यासः सूतादिश्च ब्रह्माद्यष्टादशपुराणानि चतुर्लक्षश्लोकात्मकानि। सर्वपुरुषार्थः

( ६ ) कलौ विक्रममरणानन्तरं पुनःश्रवणमुपपुराणपदबोध्यानि पुराणानि ॥ संस्कारकः व्यासाः सूताश्च।

भविष्यत्पुराणप्रतिसर्गपर्वचतुर्थखण्डस्थश्लोकैः ( ६ ) सङ्ख्याकं वृत्तमुपलभ्यते—

पुनर्विक्रमभूपेन भविष्यति समाह्वयः ।
नैमिषारण्यमासाद्य श्रावयिष्यति वै कथाम् ॥
पुनरुक्तानि तान्येव पुराणाष्टादशानि वै ।
तानि चोपपुराणानि भविष्यन्ति कलौ युगे ॥ अ० १

इतोऽप्यनन्तरं पुराणेष्वनेके संस्कारा जाता इति नारदपुराणस्थसर्वपुराणविषयसूच्या महत्त्ववर्णनप्रसङ्गे प्रदर्शयिष्यामः । द्वापरान्ते व्यासदेवेनातिमहच्छतकोटिविस्तरात्पुराणाद् तदानींतनजनशक्तिह्रासादि दृष्ट्वा चतुर्लक्षमितं भूलोके रक्षितं देवलोकेऽद्यापि सर्वं तिष्ठति । सतां पदार्थानां विनाशाभावात्तद्योग्ये समये कार्यनिर्वाहार्थं तेषां सत्ता प्रायः सर्गादिषु बोध्यते ।

यथा—वायुपुराणे—प्रागुक्ता या मया तुभ्यं पूर्वकालं प्रजास्तु याः ।
तस्मिन् संवर्तमाने तु कल्पे दग्धास्तदग्निना ॥
अप्राप्ता यास्तपोलोकं जनोलोकं समाश्रिताः ।
प्रवर्तन्ते पुनः सर्गे बीजार्थं ता भवन्ति हि ॥
२ उपो० पा० ८।२३-२४

तथा महाभारते—षष्टिं शतसहस्राणि चकारान्यां च संहिताम् ।
त्रिंशत्शतसहस्रं च देवलोके प्रतिष्ठितम् ॥
एकशतसहस्रं तु मानुषेषु प्रतिष्ठितम् ॥ १।१०५-१०७

अत्रायं पुराणविषये क्रमः प्रथमत एकशतकोटिप्रविस्तरमेकमेव पुराणं पुरुषार्थत्रयसाधकं, ततो वेदप्रादुर्भावः स वेद एक एव । ततः शास्त्राणि । चतुर्विधपुराषार्थसाधकानि । द्वापरान्ते व्यासदेवैनैकवेदाच्चत्वारो वेदाः, चतुर्लक्षपुराणानि च उद्धृतानि । ततो व्यासैः सूतैश्च तत्कालस्थिताख्यानादिभिरुपपुराणानि कृतानि । आस्तामिदम् । संप्रति नारदपुराणलक्षणादिकं विवेचयिष्यामः—

नारदपुराणलक्षणं स्वयं नारदपुराणे मत्स्यपुराणे चेत्थं लिखितम्—
शृणु विप्र प्रवक्ष्यामि पुराणं नारदीयकम् ।
पञ्चविंशतिसाहस्रं बृहत्कल्पकथाश्रयम् ॥

यत्राह नारदो धर्मान् बृहत्कल्पाश्रयाणि च ॥ (नारदपु० ९७)
पञ्चविंशत्सहस्राणि नारदीयं तदुच्यते ॥ (मत्स्य० ५३।२३)

अनेन लक्षणेनेदं ज्ञायते बृहत्कल्पवृत्तान्तयुतं पञ्चविंशत्सहस्रश्लोककं च नारदपुराणं विद्यत इति । संप्रति तु समुपलभ्यमाननारदमहापुराणे बृहत्कल्पस्य सम्बन्धस्तु विद्यत एव परन्तु श्लोकसङ्ख्या द्वाविंशतिसहस्राणि विद्यन्ते, श्लोकानां सहस्रत्रयी तु नोपलभ्यत एवेति केचन ।

पाश्चात्यसंस्कृतज्ञपण्डित डॉ० एच्० एच्० विल्सनमहोदयो नारदपुराणमवलम्ब्य लिखति-नारदपुराणस्य संप्रति श्लोकाः सहस्राणि त्रीण्युपलभ्यन्ते, अतो महापुराणरूपेण नारदपुराणं कथमपि स्वीकर्तुं न शक्यते, इदं पुराणं षोडशे सप्तदशे वा शतके संगृहीतं भक्तिबोधकं विद्यते, तथा बृहन्नारदीयपुराणमपि विष्णोः स्तुतिबोधकमेवं वैष्णवानां कर्तव्याचरणबोधकं पुराणमस्तीति । परन्तु नैतत्तस्य मतं समुचितं प्रतिभाति । यतो नारदपुराणस्योल्लेखो बल्लालसेनकृतदानसागरे द्वादशशतद्वयांस्थितहेमाद्रिकृतदानखण्डे च विद्यते । तथा एकसहस्रमिते ख्रिस्ताब्दे भारते समागतयवनयात्रिणा "अल्बरुणि"संज्ञकेन स्वकीये ग्रन्थे नारदपुराणस्य समुल्लेखः कृतो विद्यते । अनेनेत्थं ज्ञायते डॉ० विल्सनमहोदयेन प्रथमाध्यायतः सप्तत्रिंशदध्यायपर्यन्तमेव नारदीयं पुराणमुपलब्धं स्यात्तेन डॉ० महोदयेनातस्तथा लिखितं परन्तु संप्रति संपूर्णस्य नारदपुराणस्योपलब्धेस्तस्य मतं न प्रमाणकोटिमाटीकते ।

संप्रति बृहन्नारदीयमहापुराणविषये भारतीयेषु कश्चन विभ्रमो विद्यते, तथाहि अद्य यावत् सर्वत्र पुराणपारायणे प्रवचने च द्वाचत्वारिंशदध्यायात्मकमेव मुरादाबादमुद्रितं नारदपुराणं स्वीक्रियतेस्म । बृहन्नारदीयं तु यद्वास्तविकं महापुराणं तदुपेक्षितं सदुपपुराणेषु गणयन्ति स्म । कदाचिन्नारदपुराणेन सह बृहच्छब्दस्यप्रयोगोपलब्ध्या मूलं नारदपुराणमुपबृंहितं सत् बृहन्नारदीयं जातमत एतद् बृहन्नारदीयपुराणमुपपुराणे गणयित्वा यद्वस्तुतोऽपूर्णं भ्रमेण तथैव मुद्रितं तन्महापुराणेषु गणयित्वा महापुराणत्वेन प्रसिद्धिं गतम् । परन्त्वस्य भ्रमस्य निरासो गते वर्षे कार्तिकशुक्लपक्षे नवमीतः पूर्णिमापर्यन्ते समये श्रीमत्परमास्तिकश्रेष्ठद्विजवरकाशीराजमहाराजैः प्रवर्तिते पद्मनाभमन्दिरे नारदपुराणप्रवचनप्रारम्भे जातः । मुरादाबाद-

मुद्रितं भाषाटीकायुतं[1] तथा मुंबईवेंकटेश्वरमुद्रितं बृहन्नारदीयपुराणं इति पुराणद्वयमानीय समालोच्योभयोः समानानुपूर्वीकत्वं क्वचन वैपरीत्यं विचार्य च निर्णयकरणसमये संशयो जातः। तथाहि वेंकटेश्वरमुद्रायन्त्रमुद्रितनारदपुराणग्रन्थस्यावरणे नारदीयमहापुराणमिति लेखनेऽपि प्रत्यध्यायं समाप्तौ "इतिश्रीबृहन्नारदीयपुराणे" इति लिखितमुपलभ्यते। मुरादाबादनगरे मुद्रिते नारदपुराणे "नारदपुराण"मित्येव लेख उपलभ्यते, अन्ते च ४२ अध्यायान्ते नारदपुराण समाप्तमिति लेखोपलभ्यते, अतो नारदमहापुराणं वस्तुतः कियत्परिमाणमितिजिज्ञासायामुभयोरध्यायश्लोकानां समालोचनमावश्यकं जातम्, तत्कृते इत्थं परिज्ञातमुभयग्रन्थे एकचत्वारिंशदध्यायाः श्लोकाश्चैकरूपा एव। मुरादाबादमुद्रिते यो द्वाचत्वारिंशोध्यायः स वेंकटेश्वरमुद्रिते १२५ अध्यायोऽस्ति। तत्रापि पञ्चाशच्छ्लोकाः समानाः, वेंकटेश्वरमुद्रिते १२५ अध्यायः पञ्चाशच्छ्लोकान्त एव तत्र च पूर्वोऽर्धोऽपि समाप्त एव। पूर्वार्द्धे च चत्वारः पादाः सन्ति। मुरादाबादमुद्रितनारदपुराणे ४२ अध्यायाः सन्ति पादव्यवस्था पूर्वोत्तरार्द्धादिव्यवस्था च नास्ति। ४२ अध्याये ५० श्लोकेभ्योऽनन्तरमेकत्रिंशच्छ्लोका अधिकाः सन्ति, एवं ८१ श्लोकैरध्यायः समाप्यते पुराणमपि तत्रैव समाप्तम्। एते एकत्रिंशच्छ्लोकाः कुत्रत्या इति जिज्ञासायां वेंकटेश्वरमुद्रिते बृहन्नारदीयपुराणे स्थितस्योत्तरभागस्य ८२ अध्यायस्य ३२ श्लोकेभ्योऽनन्तरं समानानुपूर्वीकास्त उपलभ्यन्ते। एतेषु तेषु श्लोकेषु केवलं पुराणमाहात्म्यं पुराणं केन कस्मै पाठितमित्यादिकं विद्यते। तत्रापि मुरादाबादमुद्रिते ४० तमः श्लोको नास्ति, स एतादृशो विद्यते—

पञ्चविंशत्साहस्री संहितेयं प्रकीर्तिता।
पञ्चपादसमायुक्ता कृष्णद्वैपायनेन ह॥ इति।

मुरादाबादनगरे यावदध्यायश्लोकात्मकमर्थात् ४२ अध्यायात्मकं पुराणमुपलब्धं तत्र च समाप्तमिति च लेखो दृष्टः स्यात्तत्र "पञ्चविंशत्साहस्री" इत्यादिश्लोको न स्यादेवेति उचितमेव। नोचे'त्पञ्चविंशत्साहस्री' श्लोकदर्शनेन

(१) मुरादाबादभाषाटीकासहितंनारदपुराणम्, पताकासंज्ञकपत्रिकायां संवत् १९६६ शुभे ऋषिकुमाररामचन्द्रशर्मणा संपाद्य ६।३।४७ सन्काले संमुद्र्य प्रकाशितम्।

कथमत्यल्पं प्रायस्त्रिसहस्रश्लोकात्मकमिदमित्यवश्यं मुद्रकसंपादकयोश्चेतसि संदेह उदियादेव। अनेनेत्थं कल्प्यते स्वरुच्यनुसारं केनचित्स्वपारायणं कर्तुं बृहन्नारदीयपुराणादियदध्यायश्लोकात्मकं भागं विलिख्य "पञ्चविंशत्साहस्री" इति विरुद्धश्लोकं निष्कास्य च स्वकार्यं संपादितं स्यात्तदेव मुरादाबादनगरस्थमुद्रकसंपादकाभ्यामुपलब्धं भवेत्। तदेव भाषाटीकायुतं सर्वत्र लब्धप्रचारं नारदपुराणं महापुराणान्तर्भूतमिति मत्वा प्रवचनपारायणपरम्परायां भ्रमेण स्वीकृतं सल्लब्धप्रतिष्ठं जातमिति मन्ये। एवं विद्वत्सु द्वितीयो भ्रमोऽयमासीत् बृहन्नारदीयं नाम पुराणं मुरादाबादमुद्रितपुराणापेक्षया बृहद्विद्यते परन्तु तदुपपुराणं महापुराणं तु संप्रति नोपलभ्यत एवेति। यथा मतं पाश्चात्यविदुषो डा० विलसन् महोदयस्यासीत्। परन्तु वस्तुतः बृहच्छब्दो न परिमाणबोधकः किन्तु पूर्वप्रदर्शितमात्स्यनारदपुराणोक्तनारदपुराणलक्षणेनैतन्नारदपुराणं पद्मपुराणं यथा पाद्मकल्पे काले श्रावितं तथैव बृहत्संज्ञककल्पे श्रावितमित्यर्थस्य बोधकं बृहत्पदम्। इदं विस्तरत एतदर्थं कथितं प्रचलितभ्रमनिवारार्थमेव।

उपपुराणेऽप्येकं नारदपुराणं समुपलभ्यते, यथासूतसंहितायामुपपुराणगणनाप्रसङ्गे लिखितं समुपलभ्यते—

षष्ठं तु नारदीयाख्यं कापिलं सप्तमं विदुः॥ इति। आस्तामिदम्।

इतरपुराणापेक्षया नारदपुराणे सर्वपुराणानां लक्षणैःसह प्रतिपाद्यविषयाणां प्रायो मुख्यांशानां सूचिका, अध्याय-श्लोकानां बोधिका यदिस्यात्पाद-पूर्वोत्तरभागव्यवस्था सापि वर्णिताऽस्ति। तेन संप्रति समुपलभ्यमानेषु महापुराणेषु कियन्तोंशाः प्राचीनाः कियन्तश्च नवीनाः संप्रदायाभिमानिभिः संयोजिताः, लुप्ताश्चेति सम्यक्तया ज्ञातुं शक्यते। यद्यपि मत्स्यादिपुराणेषु केषुचित्पुराणलक्षणानि कस्मिन् कल्पे कस्य पुराणस्य प्रादुर्भावोऽतिसंक्षेपेण स्वरूपादिकं चास्ते, परन्तु नारदपुराणतुलनया तदतीवसंक्षिप्तमस्ति। केचन नारदपुराणस्य पुराणानां विषयसूचिका न प्राचीना किन्तु नवीना केनचिन्निर्माय योजितेति वदन्ति। अतः सूचिकायाः प्राचीनत्वे विचारकरणमत्यावश्यकं, तेन नारदमहापुराणस्य प्राचीनत्वं तत्र निर्दिष्टानां पुराणानां ततोऽप्यतिप्राचीनत्वं संसिध्येत्। अतस्तदेव प्रारभ्यते। विष्णुपुराणस्य लक्षणादिकं

मात्स्ये नारदमहापुराणे चेदृक् समुपलभ्यते—

वाराहकल्पवृत्तान्तमधिकृत्य पराशरः ।
यत्प्राह धर्मानखिलांस्तदुक्तं वैष्णवं विदुः ॥
त्रयो विंशति साहस्रं तत्प्रमाणं विदुर्बुधाः ॥ इति मात्स्ये ५३

नारदपुराणे— श्रृणु वत्स प्रवक्ष्यामि पुराणं वैष्णवं महत् ।
त्रयोविंशति साहस्रं सर्वपातकनाशनम् ।
यत्रादिभागे निर्दिष्टाः षडंशाः शक्तिजेन ह ॥

एवं प्रचलितविष्णुपुराणनाम्ना प्रसिद्धविष्णुपुराणे यथा षडंशास्थविषया विद्यन्ते तथैव सूचिकायामपि निर्दिष्टम् । ततः उत्तरभागविषयसूचिका एवं विद्यते—

उत्तरभागे— अतः परस्तु सूतेन शौनकादिभिरादरात् ।
पृष्टेन चोदिताः शश्वद्विष्णुधर्मोत्तराह्वयाः ॥
नानाधर्मकथाः पुण्या व्रतानि नियमा यमाः ।
धर्मशास्त्रं चार्थशास्त्रं वेदान्तं ज्योतिषं तथा ।

इत्यादिप्रकारेण विष्णुधर्मोत्तरपुराणस्थविषयान् संसूच्यान्ते—

एतद्विष्णुपुराणं वै सर्वशास्त्रार्थसंग्रहम् ॥ इत्युपसंहृतम् ।

एतत्प्रदर्शनेनेत्थं संसाध्यते नारदपुराणप्रोक्तविष्णुपुराणसूचिकासमये विष्णुपुराणं षडंशात्मकं विष्णुधर्मोत्तरं चैकस्यैव पुराणस्य षडंशात्मकः पूर्वभागः, विष्णुधर्मोत्तराख्यनानाधर्मकथा-ज्योतिषादिरूप उत्तरभागः, एवं च मिलित्वैकमिव विष्णुपुराणनाम्ना व्यवह्रियमाणं त्रयोविंशतिसहस्रश्लोकात्मकं पुराणमासीत् । श्रीशङ्कराचार्याणां समयतःपूर्वमेव नारदपुराणसूचिकाप्रदर्शितव्यवस्था लुप्ता लोकानां स्मृतिपथान्निर्गतेति च वक्तुं शक्यते । यतः श्रीशङ्कराचार्यैर्विष्णुपुराणं विष्णुधर्मोत्तरपुराणं च भिन्नत्वेनाङ्गीकृतम् । तैर्विष्णुसहस्रनामभाष्ये लिखितम् "विष्णुपुराणान्ते श्रीपराशरेणोपसंहृतम् । 'यस्मिन्न्यस्तमतिरिति" इति प्रचलिते विष्णुपुराणनाम्ना प्रसिद्धे षडंशात्मके सप्तसहस्रपरिमितश्लोकात्मके पुराणे "यस्मिन्न्यस्तमतिः" श्लोकः षष्ठांशस्याष्टमाध्याये पञ्चपञ्चाशत्सङ्ख्याको विद्यतेऽर्थादन्ते एवास्ति । एवं च

श्रीशङ्कराचार्या अपि विष्णुपुराणस्य समाप्तिः संप्रत्यस्माभिर्यथा मन्यते तथैव मन्यन्ते स्म। तथा विष्णुसहस्रनामभाष्ये पार्थक्येन नामनिर्देशं विष्णुपुराण-विष्णुधर्मोत्तराभ्य प्रमाणानि गृह्णन्तिस्म।[१] एवं च विष्णुपुराणं विष्णुधर्मोत्तरपुराणं च सर्वथा भिन्नमेव न त्वेकस्यैव ग्रन्थस्य पूर्वोत्तरभागरूपमिति व्यवहारः संप्रति यथा प्रचलितः तेषां समये तथैवासीत्। अतो नारदपुराणस्थविष्णुपुराणसूचिका श्रीशङ्कराचार्येभ्यः परमप्राचीने तत्काले विस्मृतेति च कथनेन भासमानेयं विसङ्गतिः परिहर्तुं शक्यते नान्यथा। एवं च मत्स्यपुराणोक्ते विष्णुपुराणलक्षणे "त्रयोविंशतिसाहस्र"मिति श्लोकवर्णनमपि पूर्वोत्तरभागरूपमेकमेवपुराणमिति स्वीकारे सङ्गच्छते। संप्रति विष्णु-पुराणनाम्ना प्रसिद्धे विष्णुपुराणे सप्तसहस्रश्लोका उपलभ्यन्ते, तथा विष्णुधर्मोत्तर-नाम्ना सर्वथाभिन्नत्वेन स्वीक्रियमाणे पुराणे ( व्यङ्कटेश्वरयन्त्रमुद्रिते ) प्रायो विंशति-सहस्रश्लोका लभ्यन्ते ( एतच्छ्लोकाधिक्यं मूर्तिवर्णनादिना समधिकचतुःसहस्रश्लोकै-र्वृद्धमित्यादियथार्थसमालोचनामर्हति )। विष्णुधर्मोत्तरे स्थितज्यौतिषांशमवलम्ब्य ब्रह्मगुप्तेन स्वीय ज्यौतिषं लिखितमिति सूर्यसिद्धान्तटीकाकारोक्तिःसङ्गच्छति, यतो-नारदपुराणस्थविष्णुपुराणसूचिकायां ज्यौतिषांशोऽस्ति। एवं च नारदपुराणोक्तमत्स्य-पुराणोक्तविष्णुपुराणलक्षणेन त्रयोविंशतिसहस्रश्लोकात्मकं पूर्वोत्तरभागयुतमेकमेव पुराणं श्रीशङ्कराचार्यतः पूर्वतरकाले लोके प्रसिद्धमासीदतः ख्रिस्ताब्दपञ्चशत्याः पूर्वं नारदपुराणस्थसर्वपुराणसूचिका, नारदपुराणं तथान्यानि पुराणानि अब्दानां पञ्चश-तीतः पूर्वं प्रादुर्भूतानि न तु सर्वथार्वाचीनानीति निश्चयेन वक्तुं शक्यते। ततः पूर्वं कदा प्रादुर्भूतानीति न निश्चयेन वक्तुं शक्यते यतोऽथर्ववेदे पुराणस्य ग्रन्थरूपत्वेन समुल्लेखोऽस्तीति पूर्वं प्रदर्शितमेव। नारदपुराणस्थसर्वपुराणविषयाणां महत्याः सूच्याः सर्वपुराणविषयाणां प्राचीनत्व-नूतनत्व-प्रक्षेपत्व-निष्कासन-न्यूनीकरणत्वादि विचारे महानुपयोगोऽस्तीति निश्चप्रचम्। यथा विष्णुधर्मोत्तरे नारदपुराणोक्त-वेदान्तांशोऽत्यल्प उपलभ्यते। नारदपुराणेनानिर्दिष्टा विषया मूर्तिनिर्माणादयोऽति-

---

१—"योऽहं सत्त्वं जगच्चेदं सदेवासुरमानुषम्। अविद्यामोहितात्मानः पुरुषा-भिन्नदर्शिनः इति विष्णुपुराणे" इति "पवित्राणां पवित्रं यः" इति विष्णुसहस्रनामदशमश्लोकव्याख्याने तथा-"यच्छन्दमन्नाम यस्य तत्तस्मिन्नेव वस्तुनि १०" इति विष्णुधर्मोत्तरवचनात् "इति त्रयोदशश्लोकव्याख्या प्रारम्भे। एवं यानि नामानि गौणानीति श्लोकव्याख्यायामिति।

विस्तृता विद्यन्ते। तथा श्लोकसङ्ख्यापि त्रयोविंशतिसहस्रीतोऽधिका विद्यन्ते। अस्य वास्तविकं यथार्थभूतं विवेचनम् अन्यदा करिष्यामः।

नारदपुराणस्थां प्रतिपुराणसूचिकामवलम्ब्य कियन्तोंऽशाः प्राचीनाः कियन्तश्च संप्रदायप्रवर्तकैर्मेलिताः कियन्तश्च निष्कासिता अल्पत्वं वा नीता इत्यादिकं ज्ञातुं शक्यम्। यथा—पद्मपुराणे पाखण्डिनां लक्षणं मायावादनिन्दा तामसपुराणानां लक्षणम्, ऊर्ध्वपुण्ड्रादिधारणप्रशंसा, द्वैतस्य प्रशंसा इत्यादयः। तत्र पाखण्डिलक्षणे—

> शङ्खचक्रोर्ध्वपुण्ड्रादिचिह्नैः प्रियतमैर्हरेः।
> रहिता ये द्विजा देवि ते वै पाखण्डिनः स्मृताः॥ पद्म० उ० २३५।५

इत्यादयः संप्रति पुराणेषूपलभ्यमाना एतेभ्यः संप्रदायेभ्योऽतितरप्राचीने समये व्यासविरचितपुराणेषु नोपलभ्येरन्। यतो नारदपुराणस्थपद्मपुराणसूचिकायां तेंऽशा न विद्यन्त एव। एवं तामसशास्त्राणि ( पद्मपु० १३५, २-१३ ) तामसपुराणानि ( पद्म० पु० २३५, १८-२६ ) वर्णितानि। तत्र मत्स्य-कूर्म-लिङ्ग-शिव-स्कन्द पुराणानां, गौतम-बृहस्पति-संवर्त-यम-उशनस्-साङ्ख्यस्मृतीनां च नरकप्रदत्वमुद्घोषितम्। एतादृशा अंशाः प्रक्षिप्ताः भवेयुः परन्तु तान् दृष्ट्वा ते मूलव्यासविरचिते पुराणे भवेयुरिति मत्वा च सर्वथा पुराणान्यतिनूतनानीति कथनं केषाञ्चनाधुनिकानां न शोभतेतराम्। आस्ताम्। एतत्सर्वं विवेचनं नारदपुराणस्थ-सर्वपुराणविषयसूचीदर्शनेन कर्तुं शक्यत इति नारदपुराणस्थसर्वपुराणविषयसूच्या अतिमहत्वं पुराणविवेचनेऽस्तीति निर्विवादम्, परन्त्वद्ययावत्साविषयसूच्युपेक्षितै-वासीत्।

संप्रति नारदपुराणस्य स्वरूपं संप्रत्युपलभ्यमानश्लोकादिकं च विविच्यते—
नारदपुराणस्य स्वरूपम्, यथा—

> यत्राह नारदो धर्मान् बृहत्कल्पाश्रयाणि च।
> पञ्चविंशत्सहस्राणि नारदीयं तदुच्यते॥ मत्स्यपु० ५३।२३
> शृणु विप्र प्रवक्ष्यामि पुराणं नारदीयकम्।
> पञ्चविंशति साहस्रं बृहत्कल्पकथाश्रयम्॥ नार० पु० ९७

एवं च पूर्वोत्तरभागयुतं पञ्चविंशतिसहस्रश्लोकात्मकं नारदपुराणं नारदपुराण-

अन्येषां यो न पापानि चिन्तयत्यात्मनो यथा।
तस्य पापागमस्तात हेत्वभावान्न विद्यते ॥१।१९।५

कर्मणा मनसा वाचा परपीडां करोति यः।
तद्बीजं जन्म फलति प्रभूतं तस्य चाशुभम् ॥१।१९।६

सोऽहं (प्रह्लादः) न पापमिच्छामि न करोमि वदामि वा।
चिन्तयन्सर्वभूतस्थमात्मन्यपि च केशवम् ॥१।१९।७

शारीरं मानसं दुःखं दैवं भूतभवं तथा।
सर्वत्र शुभचित्तस्य तस्य मे जायते। कुतः ॥१।१९।८

एवं सर्वेषु भूतेषु भक्तिरव्यभिचारिणी।
कर्तव्या पण्डितैर्ज्ञात्वा सर्वभूतमयं हरिम् ॥१।१९।९

साम चोपप्रदानं च भेद-दण्डौ तथापरौ।
उपयाः कथिताः सर्वे मित्रादीनां च साधने ॥१।१९।३५

साध्याभावे महाबाहो साधनैः किं प्रयोजनम् ॥१।१९।३६उ

अविद्यान्तर्गतैर्यत्नः कर्तव्यस्तात शोभने ॥१।१९।३९उ

विद्याबुद्धिरविद्यायामज्ञानात्तात जायते ॥१।१९।४०पू

तत्कर्म यन्न बन्धाय सा विद्या या विमुक्तये।
आयासायापरं कर्म विद्याऽन्या शिल्पनैपुणम् ॥१।१९।४१

न चिन्तयति को राज्यं को धनं नाभिवाञ्छति।
तथापि *भाव्यमेवैतदुभयं प्राप्यते नरैः ॥१।१९।४३

सर्व एव महाभाग महत्त्वं प्रति सोद्यमाः।
तथापि पुंसां भाग्यानि नोद्यमा भूतिहेतवः ॥१।१९।४४

जडानामविवेकानामशूराणामपि प्रभो।
भागभोज्यानि राज्यानि सन्त्यनीतिमतामपि ॥१।१९।४५

तस्माद्यतेत पुण्येषु य इच्छेन्महतीं श्रियम्।
यतितव्यं समत्वे च निर्वाणमपि चेच्छता ॥१।१९।४६

—मध्वाचार्य आद्य

---

* जीवानन्दसंकरणे 'भाव्यम' इति पाठः, स एव समीचोन इति प्रदत्तः। श्रीधराचार्या अप्यमुमेव पाठमनुसरन्ति। गी० प्रे० संस्करणे तु 'भावम्' इति पाठः।

## ACTIVITIES OF THE ALL-INDIA KASHIRAJ TRUST

### (July—December, 1965)

### (1) Critical Editions of the Purāṇas

(a) *Matsya Purāṇa* :

Critical edition of the Matsya Purāṇa is being prepared by Dr. V. Raghavan at Madras, as already reported in the previous reviews. Work is progressing on the extra chapters in Grantha Manuscript and also in the preliminary editorial work of the main Matsya. Collations of Bhuvanakośa chapters of Matsya were done at the instance of the Head Office and a part of the collation sent to Banaras.

(b) *Vāmana-Purāṇa* :

Twenty manuscripts of the Vāmana-Purāṇa have been collated so far—13 Devanāgarī Manuscripts, 1 Śāradā Ms., 1 Kashmiri Ms., 3 Bengālī Ms., 1 Telugu Ms. and 1 Nandi Nāgarī Ms. Of these, the eighteen Mss. have been collated previously as stated in the previous review. One Nandi Nāgarī Palm-leaf Ms. from the Śringerī Mutt, Mysore, and one Devanāgarī Ms. (micro-film) from the Oxford University Library have been collated during this period.

The Nandi Nāgarī Ms. has been procured from the Jagad-guru Śrī Śaṅkarācārya of the Śringerī Mutt through Pt. Rama-Chandra Sastri, Principal of the Sanskrit College of the Banaras Hindu University. We are thankful for the kind co-operation received.

Efforts are also being made to procure a Telugu Ms. from Mysore, so that some definite idea may be had about the nature of the South Indian version of the Vāmana Purāṇa.

The critical text of the Vāmana Purāṇa is also being constituted, and simultaneously critical apparatus is also being prepared.

# काशिराजन्यासस्य कार्यविवरणम्

( जुलाई १९६५—दिसम्बर १९६५ )

## १. पुराणानां पाठसमीक्षात्मकानि संस्करणानि

### ( अ ) मत्स्यपुराणकार्यम्

यथा पूर्वकार्यविवरणे सूचितं मत्स्यपुराणस्य समीक्षात्मकं संस्करणं मद्रासनगरे डा० वे० राघवन्महोदयैः सम्पाद्यमानं वर्तते । मत्स्यपुराणस्य ग्रंथलिपिलेखस्यातिरिक्ताध्यायानां सम्बन्धे कार्यं प्रचलति तथा मत्स्यपुराणस्य मुख्यभागस्य संपादने अपि कार्यं प्रचलति । मत्स्यपुराणस्य भुवनकोशाध्यायानां रामनगरकेन्द्रस्य निदेशात् संवादः कृतः । संवादश्च तत्र प्रेषितः ।

### (आ) वामनपुराणकार्यम्

अद्यावधि वामनपुराणस्य विंशतिसंख्यकानि हस्तलिखितमातृकापुस्तकानि संवादितानि—देवनागरीलिपिपुस्तकानि १३, शारदापुस्तकं १, काश्मीरीपुस्तकम् १, वङ्गलिपिपुस्तकानि ३, तेलगुलिपिपुस्तकम् १, तथा नन्दिनागरीलिपिपुस्तकम् १ । विंशतिहस्तलिखितमातृकापुस्तकानाम् अष्टादशहस्तलेखानां विवरणं पूर्वं प्रदत्तम् । प्रस्तुतकाले तु शृंगेरीमठस्य एकः नन्दिनागरीहस्तलेखः अपरश्च आक्सफोर्डविश्वविद्यालयपुस्तकालयस्य हस्तलेखः ( माइक्रोफिल्म ) संवादितः ।

नन्दिनागरी हस्तलेखः काशी हिन्दूविश्वविद्यालयीय-संस्कृतमहाविद्यालयस्य प्राचार्यैः पं० रामचन्द्रशास्त्रिमहोदयैः श्रृङ्गेरीमठस्य जगद्गुणां श्रीशंकराचार्यपूज्यपादानां सकाशाद् आनीतः । अस्मै सहयोगाय वयं परं कृतज्ञाः स्मः ।

मैसूरतः तेलगुलिपिहस्तलेखस्याप्तयेऽपि प्रयत्नः वर्तते येन वामनपुराणस्य दक्षिणीयपाठविषये निश्चितो विचारः संभवेत् ।

वामनपुराणस्य समीक्षात्मकः पाठः निर्मीयमाणो वर्तते तथा पाठविवरणमपि समकालमेव लिख्यते ।

The Vāmana Purāṇa is being translated into Hindi by Pt. Gopalchandra Sastri of Varanasi ; it is also to be translated into English. The translation is proposed to be published along with the critical text.

### (2) Other Work on the Purāṇas

(a) At Madras Centre, Adhyāyas 5 to 11 of the *Svalpa Matsya Purāṇa* have been edited by Dr. Raghavan. The first four Adhyāyas were published in 'Purāṇa' VI. 1 ; and the next six Adhyāyas (5 to 10) are being published in the present issue. Further chapters are being edited. The Dāna Chapters there of are being collated with Matsya quotations in *Nibandhas.*

Two articles of Dr. Raghavan, the one on the *Purāṇārtha Saṅgraha* and the other on its *Nīti-Adhyāya* (XI), which were published in the 'Purāṇa' have now been republished together in a book-form for the use of scholars.

(b) *Pāda-Indexes* : The Pāda indexes of the Liṅga and the Garuḍa Purāṇas have been completed. Further work on the Pāda-indexes has been discontinued for the present on account of the work on the Vāmana-Purāṇa.

(c) *Collection of Purāṇa-quotations from the Nibandhas* :

Purāṇa quotations from 4 more Khanṇḍas of the Kṛtya Kalpataru have further been collected. Further collection has been stopped for the time being on account of the exclusive work on the Vāmana Purāṇa being done at present.

(d) *Writing of the Ādhāra-pāṭha* :

The Ādhāra pāṭha of the Agni Purāṇa has been completed and checked. Up till now the *Ādhāra-pāṭhas* of the ten Mahāpurāṇas, viz., Matsya, Vāmana, Kūrma, Brahma, Viṣṇu Mārkaṇdeya, Agni, Liṅga, Garuḍa and Brahmāṇḍa, has been written. Further writing of the Ādhāra pāṭha has been discontinued.

(e) *Subject-Indexes of the Purāṇas* :

As already stated before, subject-indexes of the six Purāṇas ( viz. Matsya, Vāmana, Kūrma, Liṅga, Viṣṇu, and

वामनपुराणस्य हिन्दीभाषायामनुवादः वाराणसीनिवासिना पं० गोपालचन्द्र-शास्त्रिणा क्रियते। इदं पुराणम् आंग्लभाषायामपि अनूदितं भविष्यति। अनुवादः समीक्षात्मकपाठेन सहैव प्रकाशितो भविष्यति।

## २. पुराणसम्बन्धीनि अन्यकार्याणि

(अ) मद्रासनगरे स्वल्पमत्स्यपुराणस्य केचित् अन्येऽपि अध्यायाः डा० राघवनमहोदयैः सम्पादिताः। चत्वारोऽध्यायाः 'पुराण' पत्रिकायाः ६ भागे, १ अङ्के प्रकाशिताः। षडध्यायाः (५-१०) अस्मिन्नङ्के प्रकाश्यन्ते। अग्रेपि अध्यायाः संपाद्यमाना वर्त्तन्ते। डा० राघवन्महोदयानां पुराणपत्रिकायां प्रकाशितौ द्वौ निबन्धौ—एकः पुराणार्थसंग्रहविषयको अपरश्च पुराणार्थसंग्रहस्य नीति-अध्यायः (एकादशोऽध्यायः) एकत्र पुस्तकरूपेण प्रकाशितौ विदुषामुपयोगाय। अग्रिमाध्यायानां संपादनं प्रचलति। तस्य दानाध्यायानामपि निबन्धग्रंथेषु उपलब्धानां दानवचनानां साहाय्येन संवादः क्रियते।

(आ) **पादसूची**—लिङ्गगरुडपुराणयोः पादसूची पूर्णा जाता। वामनपुराणस्य सम्पादनकार्यानुरोधेन साम्प्रतं पादसूचीकार्यं स्थगितं वर्त्तते।

### (इ) निबन्धेभ्यः पुराणोद्धरणानां संग्रहः

कृत्यकल्पतरुग्रन्थस्य अन्येषां चतुर्णां खण्डानामुद्धरणानि संगृहीतानि। वामनपुराणकार्यानुरोधेन इदमपि कार्यं सम्प्रति स्थगितम्।

### (ई) आधारपाठस्य लेखनम्

अग्निपुराणस्य आधारपाठलेखनम् समाप्तम्। तस्य मूलपाठेन तुलनाऽपि कृता। अद्य यावत् दशमहापुराणानाम्—मत्स्य-वामन-कूर्म-ब्रह्म-विष्णु-मार्कण्डेय-अग्नि-लिङ्ग-गरुड-ब्रह्माण्ड—इत्येतेषाम् आधारपाठस्य लेखनं संपूर्णम्। अन्य-पुराणानामाधारपाठलेखनकार्यं सम्प्रति स्थगितम्।

### (उ) पुराण-विषयसूची

यथा पूर्वविवरणे सूचितं षण्णां महापुराणानाम्—मत्स्य-वामन-कूर्म-लिङ्ग-विष्णु-मार्कण्डेय-इत्येतेषां—विषयसूची पूर्णा वर्तते। आसां विषयसूचीनां

Mārkaṇḍeya) have been prepared. Out of which those of the Vāmana and the Kūrma have already been published in the 'Purāṇa' Vol. III. The subject-index of the Viṣṇu Purāṇa is being published in the present issue of the Bulletin. A brief summary of this Sanskrit subject-index is also being given in English along with it. As the English translation of this Purāṇa by such eminent scholar as Wilson, is available, it is hoped that the scholars will find it convenient to go through this subject-index of the Viṣṇu Purāṇa, and will kindly send their suggestions.

### (3) 'PURĀṆA' BULLETIN

Up till now seven annual volumes consiting of 14 issues and about 3000 pages containing articles on almost all the Mahāpurāṇas and some of the Upa-purāṇas have been published. With the present issue it starts its eighth Volume. The demand from tbe scholars and institutions for this Bulletin has been increasing. Besides the eight foreign Journals which are being received in exchange for the 'Purāṇa' as reported in Purāṇa VI 1., we have now also received in exchange the following three important Journals from the Asian countries:—

1. Journal of the Siam Society, Bangkok ;
2. Journal of the South Seas Society, Singapore,
3. Bulletin of Tibetology from the Namgyal Institute of Tibetology, Gangtok, Sikkim.

We are thankful to these institutions for this exchange.

### (4) THE LIBRARY OF THE PURĀṆA DEPARTMENT.

The Library of the Purāṇa Department has been re-organised on the modern colon-system by Shri R. R. De, B. Sc., Lib.Dip., the Special Officer of the Saraswatī Bhaṇḍāra of the Ramnagar Fort. We are thankful to him, and also to the Maharaja Banaras Vidyā Mandir Trust for lending his services to our Purāṇa Department for this purpose.

This Library contains books mostly on the Purāṇas, besides books on other branches of Indology, such as Epics, Veda, Dharmaśāstra etc. It also contains several good Indological publications in German, French and Tibetan. The Hebrew University, Jerusalem, has presented to the library of the Kashiraj Trust a set of valuable works on the Jewish culture.

वामनकूर्मपुराणयोर्विषयसूच्यौ पुराणपत्रिकायास्तृतीयभागे प्रकाशिते। 'पुराण' पत्रिकाया अस्मिन् अङ्के विष्णुपुराणस्य विषयानुक्रमणी प्रकाशिता वर्तते। संस्कृतभाषायां प्रस्तुताया अस्या विषयसूच्या आङ्ग्लभाषायामपि संक्षेपोऽत्र प्रदीयते। विष्णुपुराणस्य डा० विल्सनमहोदयेन कृत आंग्लानुवादः सुलभः वर्तते, अतः अस्याः सूच्या उपयोगे विद्वद्भ्यः सौकर्यं भविष्यति। तेषां सम्मतिः प्रार्थिताऽस्ति।

## (३) 'पुराणम्' पत्रिका

अद्यावधि पुराणपत्रिकायाः चतुर्दशखण्डात्मकाः सप्त अङ्काः प्रकाशिताः, येषु समस्तानि महापुराणानि कानिचित् उपपुराणानि चाधारीकृत्य लेखा वर्तन्ते। वर्त्तमानादङ्कात् पत्रिकाया अस्याः अष्टमो वर्षः प्रारब्धः। विश्वविद्यालयानां शोध-संस्थानां भारतीविद्याविदां च अस्याः पत्रिकायाः प्रेप्सा उत्तरोत्तरं वर्द्धमानाऽस्ति। पुराणपत्रिकायाः VI. 1 अङ्के सूचितं यदस्याः पत्रिकाया विनिमयार्थम् अष्टौ विदेशीयपत्रिका अप्यत्र प्राप्यन्ते। इदानीमधोनिर्दिष्टा पत्रिका अपि एशियादेशेभ्यः प्राप्यन्ते—

१. श्याम सोसाइटी, बैंकाक इत्यस्य पत्रिका

२. साउथ सीज् सोसाइटी सिंगापुर, इत्यस्य पत्रिका

३. नांग्याल इन्स्टीट्यूट आव टिबेटोलाजी, गंगटोक, 'सिकिम' इत्यस्य बुलेटिन आव टिबेटोलाजी इत्याख्या पत्रिका। वयमेतदर्थम् आभ्यः संस्थाभ्यः परं कृतज्ञाः स्मः।

## (४) पुराणविभागस्य पुस्तकालयम्

पुराणविभागस्य पुस्तकालयं रामनगरदुर्गस्थसरस्वतीभण्डारस्य पुस्तकालयस्य विशेषाधिकारिपदं भजता श्री आर. आर. देव, बी. एस-सी., महोदयेन आधुनिक 'कोलन' पद्धत्या पुनस्संघटितम्। वयं तस्मै तथा च महाराजबनारस-विद्यामन्दिरन्यासाय च कृतज्ञाः स्मः।

अस्मिन् पुस्तकालये भारतीविद्यायाः वेद-धर्मशास्त्र-काव्यादिविषयैस्सह मुख्यतः पौराणिकग्रंथा एव वर्तन्ते। जर्मन-फ्रेञ्च-टिबेटनभाषासु लिखिताः अपि प्राच्यविद्या-सम्बन्धिनः बहवः ग्रन्था सन्ति अस्मिन् पुस्तकालये। जेरुसेलमस्थ-हिब्रूविश्वविद्या-लयेन काशिराजन्यासाय यहूदीसंस्कृति विषयकाणि पुस्तकान्यप्युपहारीकृतानि।

(5) VEDA PĀRĀYAṆA

The *Pārāyaṇa* (recitation of the whole text) of the Kāṇva Śākhā of the Śukla Yajurveda from memory with its *Saṁhitā. Pada* and *Krama pāṭhas* was done in the Trust temple of Sivala Palace during the Bright-half of the month of Āṣāḍha, from June 30 to July 13, 1965. The reciter was Pt. Laksmi Kanta Ghanapathi of Varanasi.

There are very few reciters of the Atharvaveda from memory in India. So the Maharaja Dharmakārya Nidhi Trust has undertaken to encourage the memorising of the Atharvaveda. The work of memorising the whole of the Atharvaveda Saṁhitā together with its Brāhmaṇas, Āraṇyakas and Upaniṣads has been entrusted to Pt. Jagannatha Sastri Pathaka of Varanasi who is being paid a monthly stipend of Rs. 100/- for this purpose.

His Highness the Maharaja of Banaras, Dr. Vibhuti Narain Singh, has donated to the Maharaja Banaras Vidyāmandir Trust a sum of Rs. 20,500/- to be utilised as corpus for awarding stipend to the family of a Vedic scholar which for three generations at least, carries on memorising the Sāmaveda, its Brāhmaṇas and Upaniṣads.

(6) VYĀSA UTSAVA

The Vyāsa Utsava, comprising (1) the *Veda Pārāyaṇa* and (2) the *Purāṇa Goṣṭhī* was celebrated in the Sivala Palace at Varanasi from June 30 to July 13, 1965 during the whole of the bright half (*Śukla pakṣa*) of Āṣāḍha. The *Purāṇa goṣṭhī* was organised on the 11th of July on the occasion of the Vyāsa Pūjā.

The Purāṇa Goṣhṭhī was presided by His Highness Maharaja Dr. Vibhuti Narain Singh and was attended by a number of the local scholars and Pandits, such as Pt. Rajeswar Sastri Dravid, Principal of the Sāṅga-Veda Vidyālaya Varanasi, Dr. V. S. Agrawala and Dr. S. Bhattacharya, both Professors of the Indology College, Banaras Hindu University, Major S. L. Dar, Registrar of the Banaras Hindu University, Professor Baldeva Upadhyaya, the present Director of the Research Deptt. of the Vārāṇaseya Sanskrit University and others. Prof. J. H. Dave, Hon. General

## (५) वेदपारायणम्

आषाढ़शुक्लपक्षे (३० जून—१३ जुलाई १९६५) शुक्लयजुर्वेदस्य काण्वशाखायाः संहिता-पद-क्रमसहितं सम्पूर्णग्रन्थस्य कण्ठस्थं पारायणं शिवाला-प्रासादे कारितम्। इदं पारायणं वाराणसीनिवासिना पं० लक्ष्मीकान्तघनपाठि-महोदयेन कृतम्।

भारतवर्षे अथर्ववेदस्य कण्ठाग्रपारायणकर्त्तारो विरला एव सन्ति। महाराजधर्मकार्यनिधिन्यासेन अथर्ववेदस्य कण्ठाग्रीकरणाय प्रेरणा प्रदीयते। ब्राह्मण-आरण्यक-उपनिषदैः सह समग्राथर्वसंहितायाः कण्ठाग्रीकरणस्य भारः वाराणसी-निवासिना पं० जगन्नाथशास्त्रीफटकमहोदयेन स्वीकृतः। तस्मै १०० रूप्यकाणां मासिकी वृत्तिरपि दीयते।

काशिनरेशैः तत्रभवद्भिः डा० विभूतिनारायणसिंहमहोदयैः महाराजबनारस-विद्यामन्दिरन्यासाय २०५०० रुप्यकाणि समर्पितानि। अस्य विनियोगः तादृशस्य वैदिकविदुषः परिवाराय वृत्तिप्रदाने भविष्यति यस्य वंशे न्यूनतः अन्वयत्रये ब्राह्मणोपनिषदैः सह सामवेदस्य कण्ठाग्रीकरणं निरन्तरं प्रचलति।

## (६) व्यासोत्सवः

व्यासोत्सवे वेदपारायणं पुराणगोष्ठी च संयोज्येते। अयमुत्सवो वाराणस्यां शिवालाप्रासादे आषाढ़मासस्य सम्पूर्णे शुक्लपक्षे (३० जूनतः १३ जुलाई १९६५ यावत्) कृतः। पुराणगोष्ठी ११ जुलाई दिवसे व्यासपूजाया अवसरे संवृत्ता।

पुराणगोष्ठ्याः आध्यक्ष्यं तत्रभवद्भिः काशिनरेशैः डा० विभूतिनारायणसिंह-महोदयैः कृतम्। गोष्ठ्यां बहवः विद्वांसः उपस्थिता आसन्, यथा—वाराणसीस्थ-साङ्गवेदविद्यालयस्य प्राचार्यः पं० राजेश्वरशास्त्री द्रविडः, हिन्दुविश्वविद्या-लयस्य प्राध्यापकौ डा० वासुदेवशरण अग्रवालः डा० सिद्धेश्वरभट्टाचार्यश्च, हिन्दुविश्वविद्यालयस्य कुलसचिवः मेजर एस. एल. दरः, वाराणसेयसंस्कृत-विश्वविद्यालयस्य अनुसंधाननिदेशकः प्रो० बलदेव उपाध्यायः। मुम्बय्याः भारतीयविद्याभवनस्य नियामकः संस्कृतविश्वपरिषदो मन्त्री श्री जे. एच. दवे

Secretary of the Sanskrit Vishva Parishad, and Acharya T. A. V. Dikshitar, Joint General Secretary of the Parishad, both of the Bharatiya Vidya Bhavan, Bombay, were good enough to attend the function.

The report of the activities of the Kashiraj Trust was read in the beginning, and then important discussions were held on the various aspects of the work, and useful suggestions were given by the scholars. Dr. V. S. Agrawala proposed that the University Grants Commission be approached for granting stipends to the scholars memorising Vedas, and the proposal was accepted unanimously. One young scholar Sri Vinayak Ramachandra Ratate also placed a chart on Purāṇas, prepared by him, before the scholars present in the meeting. The chart was much appreciated.

### (7) Purāṇa Pāṭha and Pravacana

In the month of the last Āṣāḍha from July 1 to 8, the *Saundaryalaharī* of Śrī Śaṅkarācārya was recited and discourses on it were given by Pt. Thakur Prasad Dvivedi of our Purāṇa Department. In the month of the last Kārtika (Oct.-Nov.) the *Nāradīya-Purāṇa* was recited and the discourses on it were given by Pt. Anant Sastri Phadake, the retired Purāṇa Professor of the Vārāṇaseya Sanskrit University.

### (8) Mahārāṇī Ram Ratna Kunvari Sanskrit Pāṭhaśālā

The Mahārāṇī Ram Ratna Kunvari Sanskrit Pāṭhaśālā, working under the supervision of the Kashiraj Trust, is preparing students for the Prathamā and the Madhyamā examinations of the Vārāṇaseya Sanskrit University. Students are given a monthly stipend of Rs. 15/-. The teachers and the students of the Pāṭhaśālā also work in the Purāṇa Deptt. in their leisure time. This increases their knowledge and also gives them some monitory help.

### (9) The Purāṇa-Goṣṭhī of the Vārāṇseya Sanskrit University

Two scholars of our Purāṇa Department, Sri Anand Swarup Gupta and Pt. Madhvacharya Adya, read their papers in Sanskrit

महोदयः, एवं संस्कृतविश्वपरिषदः सहमन्त्री आचार्य टी. ए. वी. दीक्षितार महोदयः इत्युभावपि विद्वांसौ समारोहे उपस्थितौ आस्ताम्।

प्रारम्भे न्यासस्य कार्यविवरणं पठितम्। तदनन्तरं कार्यस्य विभिन्नाङ्गानां विद्वद्भिः विमर्शः कृतः। डा० वी. एस. अग्रवाल महोदयैः प्रस्तावितं यद् वेदानां कण्ठाग्रकरणे प्रवर्त्तमानेभ्यो विद्वद्भ्यः मासिकवृत्तिप्रदानाय 'विश्वविद्यालय-अनुदान-आयोग' नाम्नी संस्था प्रार्थनीयेति, प्रस्तावः सर्वसम्मत्या स्वीकृतः। विनायक रामचन्द्र रटाटे नाम्ना युवकेन पुराणविषये रचितम् एकं चित्रमपि प्रदर्शितं तत्र। इदं चित्रं उपस्थितैः जनैः प्रशंसितम्।

## (७) पुराणपाठः प्रवचनञ्च

आषाढमासे ( जुलाई १ तः ८ यावत् ) श्रीशङ्कराचार्यस्य सौन्दर्यलहर्याः पारायणं कृतम् तथा तद्विषये पुराणविभागीयेन पं० ठाकुरप्रसादद्विवेदिना प्रवचनं कृतम्। गतकार्तिकमासे ( अक्टूबर-नवम्बर ) नारदीयपुराणस्य पारायणं जातम् तद्विषये च वाराणसेयसंस्कृतविश्वविद्यालयस्य अवकाशप्राप्तपुराणप्रधानाध्यापकेन पं० अनन्तशास्त्रिफडकेमहोदयेन प्रवचनं कृतम्।

## (८) 'महारानी रामरत्नकुँवरि' संस्कृतपाठशाला

काशिराजन्यासस्य निरीक्षणे 'महारानी रामरत्नकुँवरि' संस्कृतपाठशाला प्रचलति या वाराणसेयसंस्कृतविश्वविद्यालयस्य प्रथमापरीक्षार्थं मध्यमापरीक्षार्थं च छात्रान् शिक्षयति। छात्रेभ्यः १५ रूप्यकाणां मासिकछात्रवृत्तिः दीयते। पाठशालायाः शिक्षकः छात्राश्च अवकाशसमये पुराणविभागेऽपि कार्यं कुर्वन्ति। अनेन तेषां ज्ञानवृद्धिः आयवृद्धिश्च भवति।

## (९) वाराणसेयसंस्कृतविश्वविद्यालयस्य पुराणगोष्ठी

संस्कृतविश्वविद्यालये गत-सितम्बरमासस्य प्रथमे सप्ताहे संयोजितायां पुराण-गोष्ठ्यां पुराणविभागस्य श्री आनन्दस्वरूपगुप्तः, श्री माध्वाचार्य आद्यश्च सिद्धि-

on '*Siddhis*' in the Purāṇas in a *Purāṇa-Goṣṭhī* organised by the Vārāṇaseya Sanskrit University in the first week of September last. Some of the scholars who had come from different places of India to participate in this *Purāṇa-Goṣṭhī* also visited our Purāṇa Department at Ramnagar, and highly appreciated its work.

(10) RĀMALĪLĀ

The religious and cultural importance of the Rāmalīlā organised every year in September-October at Ramnagar by His Highness Kashinaresha is well recognised. Apart from the huge congregation, scholars and other distinguished persons who come to Varanasi make it a point to visit this famous Rāmalīlā of Ramnagar. This year Mr. Chester Bowles, the U.S. Ambassador in India, and Mrs. Bowles, came to Ramnagar to visit the Rāmalīlā celebrations and were very much pleased to witness the spectacle. Mr. Nessim Shallon of the Technical Assistance Board, United Nations, New Delhi, and his family also visited the Ramnagar Rāmalīlā this year. He writes to His Highness in his letter of the 12th October, 1965 as follows :—

"My wife and children as well as myself enjoyed tremendously our experience in being present as your guests at the Rāmalīlā celebrations in Ramnagar. This admirable spectacle, deeply rooted as it is in ancient traditions, enlightened us about the Rāmāyaṇa and what it means to India. In recent visits to Thailand and Malaysia my wife and I had seen how widely the Rāmāyaṇa is spread beyond the borders of India ; to be able to see it enacted in its original form here, where it was born, was most exciting."

We are thankful to these distinguished visitors for their interest in Indian culture and specially in the Rāmalīlā.

DISTINGUISHED VISITORS

Sri K. M. Munshi, the Chairman of the Bharatiya Vidya Bhavan Bombay, was the guest of His Highness in the Nadesar Palace, when he came to Varanasi to deliver a series of lectures in Banaras Hindu University on the Gandhian Philosophy. As usual, he took keen interest in the work of the All-India Kashiraj Trust.

विषये निबन्धं पठितवन्तौ। भारतवर्षस्य विभिन्नस्थानेभ्यः गोष्ठ्याम् आगताः केचिद् विद्वांसः रामनगरस्य पुराणविभागेऽपि आगताः, तस्य कार्यं च प्रशंसितवन्तः।

## (१०) रामलीला

प्रतिवर्षे सितम्बर-अक्टूबरमासयोः रामनगरे तत्रभवता काशिराजेन आयोजितायाः रामलीलाया धार्मिकं सांस्कृतिकं च महत्त्वं सुप्रतिष्ठितमेव। अन्येऽपि ये विद्वांसः विशिष्टाः सज्जनाश्च वाराणसीमागच्छन्ति ते अस्याः प्रसिद्ध-रामलीलायाः दर्शनार्थमप्यागच्छन्ति। अस्मिन् वर्षे अमेरिकादेशस्य भारतस्थो राजदूतः श्री बावेल्स महोदयः सपत्नीकः रामलीलादर्शनार्थं रामनगरमागतः, दर्शनेन प्रीतश्च जातः। 'यूनाइटेडनेशन्स' इत्यस्य 'टेक्निकल असिस्टैन्स बोर्ड' संस्थायाः श्री नेसीम सैलोन (Mr. Nessim Shallon) अपि रामलीलां दृष्टवान्। तेन १२ अक्टूबर १९६५ दिनाङ्किते महाराजं प्रति प्रेषिते पत्रे इत्थं लिखितम्—

'रामनगरस्य रामलीलायाः उत्सवे भवतः अतिथिरूपेण वर्तमानाः मम पत्नी, बालकाः अहम् च अतीव प्रसन्नतामनुभूतवन्तः। भारतीयपरम्परायां बद्धमूलम् इदं प्रशस्तं दृश्यम् अस्माकं 'मलाएशिया' 'थाइलैण्ड' इत्यनयोर्देशयोः भ्रमणे अहं मम पत्नी च दृष्टवन्तौ अनुभूतवन्तौ च यत् रामायणं भारतदेशस्य सीमायाः पारेऽपि व्याप्तम् वर्तते। रामलीलाया उद्भवस्थाने भारतवर्षे अस्य रामलीला-समारोहस्य दर्शनमतीवाह्लादकरमासीदस्माकमिति।

वयं एतेभ्यः विशिष्टदर्शकेभ्यः तेषां भारतीयसंस्कृतौ विशेषतः रामलीलायां च रुचिप्रदर्शनाय कृतज्ञाः स्मः।

### विशिष्टा अतिथयः

यदा काशिहिन्दुविश्वविद्यालये 'गान्धीदर्शन' विषये व्याख्यानं दातुं श्री के. एम्. मुन्शीमहाशयः आगतः तदा सः महाराजकाशिनरेशस्य नदेसरप्रासादे अतिथिः आसीत्। पूर्ववत् सः काशिराजन्यासस्य कार्यविषये स्वरुचिं प्रदर्शितवान्।

On November 21 the President of India, Dr. Radhakrishnan, came to Varanasi to deliver the convocation address in the Vārāṇaseya Sanskrit University, and was the guest of His Highness in the Nadesar Palace. Immediately after alighting from his plane the President was pleased to enquire of His Highness, who was there to receive him, about the progress of the work of the Matsya Purāṇa edition by Dr. V. Raghavan. The publications of the Kashiraj Trust were presented to him.

The Vārāṇaseya Sanskrit University in a special Convocation conferred the degree of Vācaspatī on his Excellency Mr. Andre Malraun, Minister of State for Cultural Affairs, French Republic. His Excellency took keen interest in the Purāṇa work of the Kashiraj Trust in his talks with His Highness Dr. Vibhūti Naraina Singh. His Excellency was presented publications of the Trust by His Highness.

His Excellency the Ambassador of France in India, during his short visit to Varanasi a few months back, took very keen interest in the Purāṇa work of the Kashiraj Trust. In his two letters dated September 7th and 16th to His Highness His Excellency has been good enough to give the valuable information about the names and addresses of some Indological institutions and scholars in France to whom the Purāṇa Bulletin should be sent. We are much thankful to His Excellency for this useful information.

In the last week of November a breakfast was given by His Highness in Ramnagar Fort to the Mayors of India who came to Varanasi to participate in the All-India Mayors' Conference. They were made acquainted with the Purāṇa work of the Trust and publications were presented to them.

Their Majesties, the King and the Queen of Nepal, were the guests of His Highness Maharaja Kashinaresh in the Nadesar Palace during their three days' visit to Varanasi (from 29th November to 1st December, 1965). A welcome address in Hindi was presented to Their Majesties by the All-India Kashiraj Trust on the 29th November. The address was read by Maharaj Kumar

गत २१ नवम्बरतिथ्यां भारतगणराज्यस्य राष्ट्रपतिः डा० राधाकृष्णन् महोदयः वाराणसेयसंस्कृतविश्वविद्यालये दीक्षान्तभाषणं कर्त्तुमागतः। स नदेसर-भवने तत्रभवतः महाराजस्यातिथिश्च बभूव। वायुयानात् अवतरणकाले एव स डा० राघवन् महोदयेन सम्पाद्यमानस्य मत्स्यपुराणस्य प्रगतिविषये महाराजं पृष्टवान्। काशिराजन्यासस्य प्रकाशनानि राष्ट्रपतिमहोदयेभ्यः उपहारीकृतानि।

यदा वाराणसेयसंस्कृतविश्वविद्यालयस्य विशेषदीक्षान्तसमारोहे फ्रांसदेश-गणराज्यस्य सांस्कृतिकमंत्रिणे श्री आन्द्रे मालरो महोदयाय 'वाचस्पति' उपाधिः प्रदत्ता आसीत्, तदा स महाराजेन काशिराजेन डा० विभूतिनारायणसिंहेन सह स्ववार्तालापे पुराणकार्यविषये स्वरुचिं प्रदर्शितवान्। अस्मै महोदयाय न्यासस्य प्रकाशनान्यपि प्रदत्तानि।

फ्रांसदेशस्य भारतस्थितो राजदूतोऽपि यः कियन्मासपूर्वं वाराणसीमागतः आसीत्, काशिराजन्यासस्य पुराणकार्ये स्वरुचिं प्रदर्शितवान्। सितम्बर ७ तथा १६ दिनाङ्कितयोः पत्रयोः राजदूतमहाशयः फ्रांसदेशस्थितानां केषाञ्चित् प्राच्यविद्याविदुषां संस्थानां च नामस्थानादिविषये सूचनां दत्तवान्। वयं राजदूत-महोदयं प्रति अस्यै सूचनायै कृतज्ञावर्तामहे।

नवम्बरमासस्यान्तिमे सप्ताहे काश्याम् आयोजिते नगरप्रमुखसम्मेलने आगतेभ्यः नगरप्रमुखेभ्यः तत्रभवता काशिराजेन रामनगरदुर्गे प्रातराशगोष्ठी संयोजिता। ते पुराणविभागस्य कार्यैः अवगताः कृताः तेभ्यः काशिराजन्यासस्य प्रकाशनानि च प्रदत्तानि।

तत्रभवान् नेपालनरेशः तत्र भवती नेपालराज्ञी च काशीयात्रायां तत्रभवतः काशीनरेशस्य नदेसरप्रासादे अतिथी आस्ताम् (२९ नवम्बर—१ दिसम्बर १९६५ यावत्)। हिन्दीभाषायां स्वागताभिनन्दनं राजदम्पत्योः अर्पितम् काशिराजन्यासद्वारा २९ नवम्बरतिथ्याम्। स्वागताभिनन्दनं काशिराज-न्यासस्य न्यासीपदमलङ्कुर्वता महाराजकुमार डा० रघुबीरसिंहेन पठितम्।

Dr. Raghubir Singh, a trustee of the All-India Kashiraj Trust. Panditaraj Sri Rajeswar Sastri Dravid, Padmabhushan, read a *Praśasti* (praise) of Their Majesties in ten ślokas composed by the learned Panditaraj himself. This welcome address and the 'Praśasti' are being published elsewhere in this issue of the 'Purāṇa' bulletin.

On behalf of Their Majesties Hon'ble Sri Kirtinidhi Vista, the Vice Chairman of the Council of Ministers and the Foreign Minister of Nepal, in reply thanked His Highness and the All-India Kashiraj Trust and laid emphasis on the cultural relation between India and Nepal coming down from the ancient time. A tea party was organised by His Highness in honour of their Majesties on the same evening, in which more than 200 persons of the City were entertained. His Highness Maharaja Kashinaresh presented the welcome address and the praśasti in an ivory casket in the form of the model of the *Ghurdaur* (Maharaja's ceremonial barge). Their Majesties were also presented the publications of the Trust.

In the morning of the next day, their Majesties came to the Ramnagar Fort to pay a visit to His Highness. A breakfast to Their Majesties was arranged on this occasion. Their Majesties also visited the paintings and the manuscripts-collections of the Maharaja's Sarasvatī Bhaṇḍāra and were pleased to see them.

In December, Sri Chandra Bhanu Gupta, the former Chief Minister of U. P. and Sri Raja Rao were the guests of His Highness in the Nadesar Palace. They also took keen interest in the Purāṇa work of the Trust.

The following scholars visited the Purāṇa Department of the Kashiraj Trust and saw its Purāṇa Work :—

(1) Dr. A. D. Pusalker, director of the Research Department of the Bhandarkar Oriental Research Institute, Poona, and a distinguished Purāṇa scholar, who is also a contributor to our 'Purāṇa' bulletin. (July 12)

(2) Prof. J. H. Dave, Director of the Bharatiya Vidya Bhawan Bombay. (July 12)

पण्डितराजश्रीराजेश्वरशास्त्रिद्रविड़महोदयः स्वरचितैर्दशप्रशस्तिश्लोकैः अभिनन्दनं च कृतवान्। इदं स्वागताभिनन्दनं एषा प्रशस्तिश्च पत्रिकाया अस्मिन्नेव अङ्के प्रकाशिते वर्तेते।

माननीयः श्रीकीर्तिनिधिविष्टमहोदयः, यः नेपालदेशस्य मंत्रिपरिषदः उपाध्यक्षः विदेशमंत्री चास्ति, महाराजाय काशिनरेशाय काशिराजन्यासाय च धन्यवादं प्रदर्शितवान्। तथा च भारतनेपालदेशयोः प्राचीनकालतः आगतस्य सांस्कृतिकसम्बन्धस्य स्मरणं कारितवान्।

तत्रभवता काशिराजेन तस्यामेव सन्ध्यायां राजदम्पत्योः सम्माने उपाहार-गोष्ठी आयोजिता यस्यां शतद्वयाधिकाः प्रतिष्ठिता नागरिकाः सम्मिलिताः आसन्। तत्रभवान् महाराजकाशिराजः अभिनन्दनपत्रं प्रशस्तिञ्च नेपालाधिपतये हस्तिदन्त-निर्मिते स्व 'घुड़दौड़' इति नाम्न्या नौकायाः आकारवति पिटके समर्पितवान्। राजदम्पतीभ्यां न्यासस्य प्रकाशनानि अपि अर्पितानि।

अपरदिवसे प्रातःकाले राजदम्पती रामनगरदुर्गे आगतवन्तौ। अस्मिन्नवसरे प्रातराशगोष्ठी तयोः सम्माने आयोजिता आसीत्। राजदम्पती महाराजस्य सरस्वतीभण्डारस्य हस्तलेखान् चित्राण्यपि च दृष्टवन्तौ हृष्टौ च सञ्जातौ।

दिसम्बरमासे उत्तरप्रदेशस्य पूर्वमुख्यमंत्री श्रीचन्द्रभानु गुप्तः तथा श्रीराजारावः नदेसरभवने महाराजस्य अतिथी आस्ताम्। तौ अपि पुराणकार्ये स्वरुचिं प्रदर्शितवन्तौ।

अधोनिर्दिष्टा विद्वांसः अपि न्यासस्य पुराणविभागं दृष्टवन्तः तत्कार्यञ्च प्रशंसितवन्तः—

१. डा० ए. डी. पुसालकरः—भण्डारकरप्राच्यशोधसंस्थानस्य निदेशकः पुराणविशेषज्ञश्च

२. श्री जे. एच. दवे—भारतीयविद्याभवनस्य निदेशकः

(3) Sri Nauharia Ram, Deputy Adviser to the Ministry of Education, Govt. of India. (Aug. 26-27).

(4) Pt. Dinanath Shastri, Principal, Ramadala Sanskrit Mahavidyalaya, Delhi. (Sept. 2).

(5) Dr. A. N. Jani, Head of the Sanskrit Deptt., M. S. University, Baroda. (September 2).

(6) Sri V. V. Paranjape of the Deccan College, Poona. (September 2).

(7) Prof. V. Venkatachalam, Head of the Sanskrit Deptt., Vikrama University, Ujjain. (September 2).

(8) Dr. Niraja Kanta Chaudhari, M.A., LL.D, Ph.D., I.P. (Retired). (September 8).

(9) Prof. K. V. Sarma, Curator of the Vishweshwaranand Vedic Reeearch Institute, Hoshiarpur (Punjab). (Nov. 23).

These scholars appreciated the work of the Purāṇa Department. We are thankful to all these scholars for their interest in our work.

३. श्री नौहरियाराम—भारत सरकारस्य शिक्षाविभागस्य उपपरामर्शदाता

४. पं० दीनानाथशास्त्री—दिल्लीस्थरामदलसंस्कृतमहाविद्यालयस्य प्राचार्यः

५. डा० ए. एन. जानी—बड़ौदा विश्वविद्यालयीयसंस्कृतविभागाध्यक्षः

६. श्री वी. वी. परांजपे—दकनकालेज, पूना

७. प्रो० वी. वेङ्कटाचलम्—उज्जैन विश्वविद्यालयीयसंस्कृतविभागाध्यक्षः

८. डा० नीरजकान्त चौधरी

९. प्रो० के. वी. शर्मा—विश्वेश्वरानन्दवैदिकशोधसंस्थानस्य क्यूरैटर्-पदधारकः

इमे विद्वांसः पुराणकार्यं प्रशंसितवन्तः । वयम् एतेभ्यः कृतज्ञाः स्मः ।

## BOOK-REVIEW

ग्रह-नक्षत्र (Planets and Stars).—In Hindi. By (Dr.) Sampuranand. Published by the Hindustani Academy, Allahabad. First edition, 1965. Pages 8 + 35. Plus 34 plates on good art paper. Price Rs. 15.25.

The present work is a revised and amplified version of the four Radio-talks by the author, which were broadcast in Hindi in 1960 from the Lucknow-station of Akashbani. Its author, Dr. Sampurnanand, besides being a recognised politician and administrator, is also a versatile scholar, a well-known astronomer and a great thinker. His present work, though dealing with an astronomical subject, has a Vedic and Philosophical background, and also a Purāṇic touch.

The author has developed a technique to present a highly technical and scientific subject, such as astronomy, in simple and lucid Hindi for the benefit of the common reader. His famous work **'पृथ्वी से सप्तर्षि-मण्डल तक'**, dealing with space-travelling, is a kind of novel which presents scientific truths in the garb of a highly interesting and imaginary plot. His present work **'ग्रह-नक्षत्र'**, though dealing with the facts and principles of astronomy regarding this subject in a factual style, also keeps the reader interested throughout.

The first talk on **'ग्रह और उनकी उत्पत्ति'** covers pages 1-10 of this book. It deals, in a very interesting manner, with the birth of the planets. He draws a distinction between planets and *grahas*, and explains how Rāhu and Ketu, which are really two nodes formed by the intersection of the sun's ecliptic and the moon's orbit at two points, are rightly recognised as the *grahas* in Indian astronomy, and the worship of the nine *grahas* (**नवग्रहपूजा**), therefore, includes the worship of Rāhu and Ketu also. In this connection he also refers to the Purāṇic legend of *Amṛta-manthana* which connects Purāṇic mythology with an astronomical pheno-

mena. The author is aware of the fact that in the Purāṇas mythology is intimately connected with almost every branch of human knowledge, and so even a scientific truth has a mythological explanation.

For explaining the relation of the sun with the planets and of the planets with their satellites the author has mentioned and explained the three theories, *viz.* (1) of Laplase, (2) of Jeans and (3) of the Russian astronomer Schmidt. He has also discussed the possibility of life on the planets.

The second talk—'तारे उनकी उत्पत्ति, भेद तथा गतियाँ'—(pages 11-18) discusses the stars or *nakṣatras* and the star-clusters in their various aspects. He has also dealt with the position of the stars and the sun on the *Ākāśa-Gaṅgā* or the Milky way.

The third talk on 'नीहारिकाएं और उनकी उत्पत्ति' covers pages 19-26. The *Nīhārikās* or galaxies were not mentioned in astronomical works of ancient times ; but in modern astronomy they have acquired much importance. The galaxy known as the *Ākāśa-Gāṅgā* or the Milky way is familiar to us. But the vast firmament contains millions of such galaxies ; and even beyond these galaxies of stars there is no empty space, but it is filled with gases and star-dusts, and hence is called as 'रजसो विमान' in the language of the Vedas. The universe is sustained by the energy radiated form the sun (which is also a star), hence in the Vedas the sun is called the soul of the universe, animate and inanimate, ( सूर्य आत्मा जगतस्तस्थुषश्च' ). It is in fact the life of all the created beings ('प्राणः प्रजानामुदयत्येष सूर्यः' )

The author has discussed the formation of stars and galaxies from these gases and star-dusts. These galaxies are receding away from each other, showing that the universe is continuously expanding. Here the learned author poses a very relevant question—Universe expanding in what ? In Space ? But the space is itself a part of the universe. Then it may be expanding in Time which is both begenningless and endless ! On account of the continuous radiation of energy from the luminaries a time may come when the universe will become static and

Dissolution will follow. And here again the learned author proses a very important metaphysical question—Will some unknown Power again put the Wheel of Creation in motion ? In his opinion the process of Creation and Dissolution may go on incessantly in the womb of the Infinite Time ; and this reminds us the following statement of the Visṇu-Purāṇa :—

अनादिर्भगवान् कालो नान्तोऽस्य द्विज विद्यते ।
अव्युच्छिन्नास्ततस्त्वेते सर्गस्थित्यन्तसंयमाः ॥ (I. 2. 26).

In his fourth talk—ज्योतिष और दर्शन—(pp. 27-35) the author comes before us as a unique combination of a scientist-astronomer and a philosopher-thinker. He peeps beyond the empirical world of matter and goes to the very bottom of the problem—Whence this wonderful world ? Whither does it go with all its grandeur and incessant motion ? He enquires into the ultimate source of this universe—a point where both science and philosophy, physics and metaphysics, are bound to meet. Does this universe really come out of the non-existent (*asat*) as the scientists would have us believe ? But how can existence come out of non-existence—कथमसतः सज्जायेत, सत्त्वेव सोम्येदमग्र आसीदेकमेवाद्वितीयम्' (Chā. Up. VI. 2. 2). So the universe must have sprung from *Sat*, the undistinguished and unmanifest non-material eternal Principle of Existence. The author, however, rises above the relative notions of *sat* and *asat*, for according to him the question of *sat* or *asat*, as the source of the universe, pertains only to the lower strata of thinking, but in the higher sphere of thought there is no such thing as *sat* or *asat*, and therefore the reasoning that 'existence cannot come out of non-existence' is not applicable there. In the words of the author 'भले ही यह कहा जाय कि कुछ नहीं से कुछ की उत्पत्ति नहीं होती, परन्तु यह तर्क तो नीचे के स्तर के लिये है । जिस ऊंचे स्तर पर सर्जन और विलय की बात होती है वहां यह तर्क नहीं लगता ।' (p. 31). The Vedic seer also refers to this higher level of thought, when he remarks :

'नासदासीन्नो सदासीत् तदानीं, नासीद् रजो नो व्योमा परो यत्
(ṚV. X. 129. 1).

In the end, the learned author appeals for the study of astronomy even by the common man, for which the vast firmament with its sparkling stars is the right and free observatory which may be studied even with the naked eyes. He advocates the use of cheap instruments such as the *vaṁśa-nalikā* (bamboo-pipe) which was used in their study by our ancient Indian astronomers also, and with the help of which some 50 years ago the great astronomer of India, Sri Chandrasekhara Sāmanta, arrived at certain astronomical calculations which surprised even the Western astronomers.

More than thirty interesting plates illustrating the formation and the position of planets and stars are added at the end, which has greatly enhanced the value of the book.

—ANAND SWARUP GUPTA

# स्वल्पमत्स्यपुराणम्

संपादकः

वे० राघवः

( 'पुराणम्' VI. 1, तोऽनुवृत्तम् )

(५)

**श्रीभगवानुवाच—**

[१]कश्यपस्य प्रवक्ष्यामि पत्नीभ्यः पुत्रपौत्रकान् ।
दित्यदितिः (ती ?) दनुश्चैव अरिष्टा सुरसा तथा ॥१॥
सुरभिर्विनता तद्वत्ताम्रा क्रोधवशा इरा ।
कद्रूः खग[२] (खसा ?) मुनिस्तद्वत्तासु पुत्रान्निबोधत ॥२॥
तुषिता नाम ये देवाश्चाक्षुषस्यान्तरे मनोः ।
वैवस्वतेऽन्तरे ते वै आदित्या द्वादश स्मृताः ॥३॥
इन्द्रो धाता भगस्त्वष्टा मित्रोऽथ वरुणोऽर्यमा[३] ।
विवस्वान् सविता पूषा अंशुमान् विष्णुरेव च ॥४॥
उत्पद्यन्ते प्रलीयन्ते कल्पे कल्पे तथैव च ।
दितिः पुत्रद्वयं लेभे कश्यपादिति नः श्रुतम् ॥५॥
हिरण्यकशिपुश्चैव हिरण्याक्षस्तथापरः ।
हिरण्यकशिपोस्तद्वज्जातं पुत्रचतुष्टयम् ॥६॥
प्रह्लादोऽनुह्लादश्चैव संह्लादो ह्लाद एव च ।
प्रह्लादपुत्र आयुष्मान् शिबिर्बाष्कल एव च ॥७॥

---

१. स्व. म. ५. १-१८$_{३}$ = आ. म. ६. १-४, ७-२०$_{३}$
,, १८$_{४}$-४४ = ,, ,, ,, २२$_{२}$-४७

२. विष्णौ पद्मे च खग इति, आ. म. विश्वा इति च पाठः ।

३. आ. म. यम इति अपपाठः, यतः द्वादशादित्येषु यमो न गणितः । मत्स्यमातृकासु च अर्यमा इत्येव दृश्यते ।

विरोचनश्च[4] यः पुत्रः बलिं स पुत्रमाप्तवान् ।
बलेः पुत्रशतं त्वासीत् बाणज्येष्ठं ततः [5]प्रजाः ॥८॥
घृतराष्ट्रस्ततस्सूर्यः चन्द्रश्चन्द्रांशुतापनः ।
निकुम्भनाभो गुर्वक्षः कुक्षिर्भीमोऽथ भीषणः[6] ॥९॥
एवमाद्यास्तु बहवो बाणो ज्येष्ठो गुणाधिकः ।
बाणः सहस्रबाहुः स्यात् सर्वास्त्रगुणसंयुतः ॥१०॥
तपसा तोषितो यस्य पुरे वसति शूलधृक् ।
महाकालत्वमगमन्मान्यं[7] यश्च पिनाकिनः ॥११॥
हिरण्याक्षस्य पुत्रोऽभूदुदरः[8] शकुनिस्तथा ।
भूतसन्तापनश्चैव महानाभस्तथैव च ॥१२॥
एतेभ्यः पुत्रपौत्राणां कोटयस्तु त्रिसप्ततिः ।
महाबला महाकाया नानारूपा महौजसः ॥१३॥
दनुः पुत्रशतं लेभे कश्यपाद्बलदर्पितम् ।
विप्रचित्तिः प्रधानोऽभूद्येषां मध्ये महाबलः ॥१४॥
द्विमूर्धा शकुनिश्चैव तथा शङ्कु[ः]शिरोधरः ।
अयोमुखः सम्वरश्च कपिलो वामनस्तथा ॥१५॥
मरीचिर्मघवांश्चैव इरा वाजिशिरास्तथा ।
चित्रावरुण [9](विद्रावणश्च ?) केतुश्च केतुवीर्यः शतक्रतुः ॥१६॥
इन्द्रजित् सत्यजिच्चैव वज्रनाभस्तथैव च ।
एकव[10]क्त्रो महाबाहुर्वज्राक्षस्तारकस्तथा ॥१७॥

---

४. प्रह्लादस्येति शेषः ।
५. बाणानुजभूता इत्यर्थः ।
६. आ. म विभीषणः, मत्स्यमातृकासु पद्मे च 'अथ भीषणः' इति ।
७. आ. मत्स्ये पद्मे च साम्यं इति । मत्स्यमातृकासु च साम्योपोद्बलका एव पाठा उपलभ्यन्ते ।
८. भागवते. ॰भूदुत्कचः । मत्स्ये पद्मे च '॰भूदुलूकः' इति ।
९. मत्स्यमातृकाः 'विद्रावण' इति पाठमेवोपोद्बलयन्ति ।
१०. आ. म. ॰चक्रो ।

असिलोमा सलोमा च विद्धबालो महासुरः ।
स्वर्भानुर्वृषपर्वा च[११] ... ... ... ॥१८॥
... ... ... ... ... ।
... ... ... ... ... ॥१९॥
... ... ... चन्द्रा च वृषपर्वणः ।
पुलोमा कालकश्चैव (का चैव) जितधन्वा सुलोचनः[१२] ॥२०॥
बह्वपत्यो ( त्ये ) महासत्त्वो ( त्त्वे ) मारीचस्य परिग्रहः ( हे ) ।
तयोः स( ष )ष्टिसहस्राणि दानवानामभूत्पुरा ॥ २१ ॥
पौलोमान् कालकेयांश्च मारीचोऽजनयत्पुरा ।
अवध्या येन[१३] वालाद्वै हिरण्यपुरवासिनः ॥ २२ ॥
चतुर्मुखाल्लब्धवरास्ते हता विजयेन तु ।
विप्रचित्तिः सैंहिकेयं ( यान् ) सिंहिकायामजीजनत् ॥ २३ ॥
हिरण्यकशिपोर्ये वै भागिनेयास्त्रयोदश ।
[१४]कालकस्य (?) च राजेन्द्र नलो वातापिरेव च ॥ २४ ॥
इल्वलो नमुचिश्चैव [१५]खलुषश्चाञ्जनस्तथा ।
नरकः क ( का ? ) लनाभश्च सरमाणस्तथैव च ॥ २५ ॥
कल्पवीर्यश्च विख्यातो दनुवंशविवर्धनः ( नाः ) ।
संह्रादस्य तु दैत्यानां ( स्य ) निवातकवचाः सुताः ॥ २६ ॥
अवध्याः सर्वदेवानां गन्धर्वोरगरक्षसाम् ।
ये हता बलमाश्रित्य अर्जुनेन रणाजिरे ॥ २७ ॥

---

११. ग्रन्थपातः । स्त्रीप्रजानां निर्देशस्य उपक्रमभागः सार्धश्लोकमितः लुप्तः । दृश्यताम् आ. म. ।

१२. अत्र पुंसोर्नामनिर्देशस्यावकाशो नास्ति । आ. म. पाठानुसारमत्र 'वैश्वानरसुते हि ते' इति पाठः भवितुमुचितः । तादृश एव भागवते च

१३. आ. म. 'येऽमराणां वै' ; हरिवंशे 'देवतानां च'; पद्मे 'ये नराणां वै' इति ।

१४. आ. म. व्यंसः कल्पश्च । मत्स्यमातृकासु विविधः पाठो दृश्यते ।

१५. आ. म., मत्स्यमातृकासु, पद्मे च विविधः पाठः ।

षट्कन्या जनयामास तासां ( श्चा ) मारीचवीर्यतः ।
शुकी श्येनी च भासी च सुग्रीवी गृध्र( ध्रि )का शुचिः ॥ २८ ॥
शुकी शुकानन्धकांश्च ( उलूकांश्च ) जनयामास धर्मवित् ।
श्येनी श्येनान् तथा भासी कुररानप्यजीजनत् ॥ २९ ॥
गृध्री गृध्रान् कपोतांश्च पारावतविहङ्गमान् ।
हंससारसकारण्डप्लवान् शुचिरजीजनत् ॥ ३० ॥
अजाश्वमेषोष्ट्रखरान् सुग्रीवी चाप्यजीजनत् ।
एष भासानुजः ( ताम्रान्वयः ) प्रोक्तो विनताया निबोधत ॥ ३१ ॥
गरुडः पततां नाथो अरुणस्स ( णश्च ) पतत्रिणाम् ।
सौदामिनी तथा कन्या येयं नभसि विश्रुता ॥ ३२ ॥
सम्पातिश्च जटायुश्च गरुडस्य (अरुणस्य) सुतावुभौ ।
सम्पातिपुत्रो बभ्रुश्च शीघ्रगश्चापि विश्रुतः ॥ ३३ ॥
जटायोश्च कर्णिकारः शतगामी च विश्रुतौ ।
सारसो रज्जुवाण ( ल ) श्च भेरुण्डश्चापि तत्सुताः ॥ ३४ ॥
तेषामनन्तमभवत् पक्षिणां पुत्रपौत्रकम् ।
सुरसायां सहस्रं तु सर्पाणामभवत्पुरा ॥ ३५ ॥
सहस्रशिरसां कद्रुः सहस्रमाप यत् सुतान् ।
प्रधानास्तेषु विख्याताः षड्विंशतिररिन्दमाः ॥ ३६ ॥
शेषवासुकिकर्कोटशङ्खैरावतकम्बलाः ।
धनञ्जयमहानीलपद्माश्वतरतक्षकाः ॥ ३७ ॥
एलापत्रमहापद्मधृतराष्ट्रबलाहकाः ।
शङ्खपालमहाशङ्खपुष्पदंष्ट्रशुभाननाः ॥ ३८ ॥
शङ्कुरोमा च वहणो ( नहुषो ) वामनः फणिनः (पाणिनिः?)[१६] तथा ।
कपिलो दुर्मुखश्चापि पुत्रोऽञ्जलि( पतञ्जलि )[१७]रिति स्मृताः ॥ ३९ ॥
एषामनन्तमभवत् सर्वेषां पुत्रपौत्रकम् ।
प्रायशो यत्पुरा दग्धं जनमेजय [ स्य ] मन्दिरे ॥ ४० ॥

---

१६. पद्मे ६. ७३ ; आ. म. पाणिनः । १७. आ. मा. ; मातृकाश्च ।

रक्षोऽपि सं ( रक्षोगणं ) क्रोधवशा सुनामाया(स्वनामान)[१८]मजीजनत् ।
दष्ट्रिणं ( णां ) निय (यु) तं तेषां भीमसेनादशाक्ष (दगात्क्ष) यम् ॥४१॥

रुद्राणां च गणं तद्वत् गोमहिष्या वराङ्गना(?)[१९] ।
सुरभिर्जनयामास कश्यपाद्धृत(व्रत)संयता ॥ ४२ ॥

मुनिर्मुनीनां तु गणं गणमप्सरसां तथा ।
तथा किन्नरगन्धर्वानरिष्टाजनयद्बहून् ॥ ४३ ॥

तृणवृक्षलतागुल्मं शिवा (इरा) सर्वमजीजनत् ।
खगा (खसा?) तु यक्षरक्षांसि जनयामास कोटिशः ॥ ४४ ॥

[२०]एते कश्यपदायादाः शतशोऽथ सहस्रशः ।
एवं मन्वन्तरे विप्राः सर्गाः स्वारोचिषे स्मृताः ॥ ४५ ॥

तत एकोनपञ्चाशन्मरुतः कश्यपाद्दितिः ।
जनयामास धर्मज्ञान् सर्वानमरवल्लभान् ॥ ४६ ॥

इति स्वल्पमत्स्यपुराणे षट्पादकार्यासाहस्रे ( ? )
कश्यपान्वयो नाम
पञ्चमोऽध्यायः ।

---

१८. हरिवंशे १. ३. १६. गणं क्रोधवशं ।
१९. 'महिष्यो वराङ्गनाः' इति मूलमत्स्ये ।
२०. अयं श्लोकः आ. मत्स्ये अधिकपाठत्वेन दत्तः ।
पद्मे ६. ७९.

मनुरुवाच—

[१] अतः परं प्रवक्ष्यामि दानधर्ममशेषतः ।
व्रतोपवाससंयुक्तान् यथा मत्स्योदितानिह ॥१॥
दशधेनुविधानस्य यद्रूपमिह यत्फलम् ।
तदिदानीं प्रवक्ष्यामि सर्वपापप्रणाशनम् ॥२॥
प्रथमा गुडधेनुः स्याद् घृतधेनुरथापरा ।
तिलधेनुस्तृतीया च चतुर्थीह जलात्मिका ॥३॥
क्षीरधेनुश्च विख्याता मधुधेनुस्तथापरा ।
सप्तमी शर्कराधेनुरष्टमी लवणस्य तु[२] ॥४॥
रसधेनुश्च नवमी दशमी स्यात् स्वरूपतः ।
कुम्भधेनुः स्वर्णधेनुः रत्नधेनुस्तथैव च ॥५॥
दधिधेनुर्घृतश्चैव परं स्याद्धेनुपञ्चकम् ।
तिलधेनुस्तथा षष्ठी सप्तमी अजिनात्मिका ।
वैश्य(?)धेनुस्ताम्रधेनुर्बर्हिर्धेनुश्च वै दश[३] ॥६॥
चतुर्हस्तकृतां भूमिं दर्भानास्तीर्य सर्वतः ।
प्राङ्मुखीं कल्पयेद्धेनुमुदक्पादां सवत्सकाम् ॥७॥

---

१. स्व. म. ६ २ = आ. म. ८२.२
,, ,, ,, ३-५$_{२}$ = ,, ,, ,, १८, १९
,, ,, ,, ७$_{३}$,-८$_{२}$ = ,, ,, ,, ४$_{३}$-५$_{२}$
,, ,, ,, १४-२३$_{२}$ = ,, ,, ,, ७-६, १०$_{३}$-११, १३-१७$_{२}$
,, ,, ,, २८ = ,, ,, ,, ३१

२. मूलमत्स्ये 'दधिधेनुस्तथाष्टमी' इति ।

३. कुम्भधेनुरित्यारभ्य अन्यप्रकारेण दशधेनुवर्णनमिदम् । अत्र कतिचित् धेनवः मूलमत्स्ये पक्षान्तरतया कृत्यकल्पतर्वादिषु च निबन्धेषु दृश्यन्ते; किन्तु अत्र निर्दिष्टया रीत्या दशधेनुविकल्पो न क्वचिदुपलभ्यते ।

उत्तमा गुडधेनुः स्यान्मुदा[४] भारचतुष्टयम् ।
भारद्वये मध्यमा स्यात् कनिष्ठा भारकेण तु ॥८॥
[५]विंशतोलप्रमाणेन पल इत्यभिधीयते ।
पलानां विंशतेर्भारः तुर्यहीनः कलौ युगे ॥९॥
चन्दनेन लिखेद्धेनुं क्षौमेणैव प्रयत्नतः ।
हस्तत्रयान्तरं कृत्वा रौप्यकुम्भेषु पाणिकम् ॥१०॥
धेन्वाकृतिं च संस्थाप्य क्रमेण द्विजसत्तमाः ।
पलद्वये ललाटं च द्विगुणेनापि मस्तकम् ॥११॥
त्रिगुणेन भवेन्नासा चक्षुषी पलपञ्चकैः ।
तुर्यं तुर्यं बाहुपादौ उदरं च पलाष्टकैः ॥१२॥
पलैकेन भवेत्पुच्छं वत्सं चैव पलाष्टकम् ।
यदधिकं भवेद्रोमकूपरोमाणि कल्पयेत् ॥१३॥
धेनुवत्सौ गुणस्यैतौ[६] सितसूक्ष्माम्बरावुभौ ।
शुक्तिकर्णावक्ष[७]पादौ शुक्तिमुक्ताफलेक्षणौ ॥१४॥
सितसूत्राणि बालो भौ[८](?) सितकम्बलकम्बलौ ।
ताम्रगण्डकपृष्ठौ तौ सितचामररोमकौ ॥१५॥
विद्रुमभ्रूयुगावेतौ नवनीतस्तनान्वितौ ।
क्षौमपुच्छौ कांस्यदुघौ इन्द्रनीलकभासकौ[९] ॥१६॥
नानाद्रुम[१०]समायुक्तौ प्राणगन्तार(?)कर्णकौ[११] ।
इत्येवं रचयित्वा तु गन्धपुष्पैस्तथार्चयेत् ॥१७॥
या लक्ष्मीः सर्वभूतानां या च देवेष्ववस्थिता ।
धेनुरूपेण सा देवी मम पापं व्यपोहतु ॥१८॥

---

४. मूलमत्स्ये 'सदा'
५. प्रमाणपरिपाटीवर्णनपरः श्लोकोऽयम् ।
६. आ. म. 'घृतास्यौ तौ' इति समीचीनः पाठः ।
७. आ. म. 'इक्षु' इति समीचीनः पाठः ।
८. आ. म. 'सितसूत्रसिरालौ तौ' । ९. आ. म. 'तारकौ' ।
१०. आ, म. 'फल' । ११. आ. म. 'घ्राणगन्धकरण्डकौ' ।

विष्णोर्वक्षसि या लक्ष्मीः स्वाहा या च विभावसोः ।
चन्द्रार्कशक्रशक्तिर्या धेनुरूपास्तु सा श्रियै ॥१९॥
चतुर्मुखस्य या लक्ष्मीः या लक्ष्मीर्धनदस्य तु ।
या लक्ष्मीर्लोकपालानां सा धेनुर्वरदास्तु मे ॥२०॥
स्वधा त्वं पितृमुख्यानां स्वाहा यज्ञभुजां यतः ।
सर्वपापहरा धेनुस्तस्माच्छान्तिं प्रयच्छ मे ॥२१॥
एवमामन्त्र्य तां धेनुं ब्राह्मणाय निवेदयेत् ।
विधानमेतद्धेनूनां सर्वासामपि पठ्यते ॥२२॥
यास्तु पापविनाशिन्यः पठ्यन्ते विंशधेनवः ।
[१२]घृतस्य तुर्यकर्षेण पलमेकं विधीयते ।
तोलैकेन भवेत्कर्षं तिलस्यापि शृणु द्विज ॥२३॥
द्रोणषोडशकं माषं कृषस्य ( जलस्य ? ) कुम्भषोडश (?) ।
क्षीरस्य शक्तिमानं स्यात् तदर्धमधमं ( तदर्धं च मधु ? ) स्मृतम् ॥२४॥
शर्करायाः कर्षमात्रं प्रसृतिर्लवणस्य च ।
पलं पलं वृष(रस)स्यापि षड्दशैरेकपञ्च वा (?) ॥२५॥
शक्तिप्रमाणं स्वर्णस्य रत्नस्य खण्डखण्डशः ।
क्षीरमानं तु तैलस्य क्षीरस्य दधिरु ( ? ) च्यते ॥ २६ ॥
[१३]मुष्टिरष्टौ भवेत् खुञ्चिः[१४] द्रोणं स्यात्खुञ्चिषोडश(?) ।
पञ्चकर्षैर्भवेन्मुष्टिः सप्तकर्षैश्च प्रसृतिः ॥
तुर्यं स्वर्णे पलं ज्ञेयं लवणस्य विदुर्बुधाः ॥ २७ ॥
इति पठति समन्ताद् यः शृणोतीह सम्यङ्-
मधुसु(मु ?)रनरकारेरर्चनं चाथ पश्येत् ।
मतिमति च जनानां यो ददातीन्द्रलोके
स वसति विबुधाद्यैः पूज्यते कल्पमेकम् ॥ २८ ॥

इति स्वल्पमत्स्ये . . .　. . .　धेनुदानं
षष्ठोऽध्यायः ॥

---

१२. इत आरभ्य द्वितीयतृतीयादीनां घृततिलादिधेनूनां वर्णनम् ।
१३. पुनश्च प्रमाणपरिपाटीवर्णनम्　१४. अन्यत्र 'कुञ्चि' इति

मनुरुवाच :—

[१]भगवन् श्रोतुमिच्छामि दानमाहात्म्यमुत्तमम् ।
यदक्षयं परे लोके देवर्षिगणपूजितम् ॥ १ ॥

श्रीमत्स्य उवाच—

मेरुप्रमाणं वक्ष्यामि दशधा द्विजसत्तमाः ।
यत्प्रदानान्नरो लोकानाप्नोति सुरपूजितान् ॥ २ ॥

पुराणेषु च वेदेषु यज्ञेष्वायतनेषु च ।
न तत्फलमधीतेषु कृतेष्विह यदश्नुते ॥ ३ ॥

तस्माद्दानं प्रवक्ष्यामि पर्वतानामनुक्रमात् ।
प्रथमं धान्यशैलः स्यात् द्वितीयो लवणाचलः ॥ ४ ॥

गुडाचलस्तृतीयस्तु चतुर्थो हेमपर्वतः ।
पञ्चमो ( मः ) तैलशैलः स्यात् षष्ठः कार्पास एव च ॥ ५ ॥

सप्तमो घृतशैलश्च रत्नशैलस्तथाष्टमः ।
राजतो नवमस्तद्वत् दशमः शर्कराचलः ॥ ६ ॥

अयने विषुवे पुण्ये व्यतिपाते दिनक्षये ।
शुक्लपक्षे तृतीयायामुपरागे शशिक्षये ॥ ७ ॥

---

| | | | | | | | | |
|---|---|---|---|---|---|---|---|---|
| १. स्व. | म | ७. | १-६ | | आ. | म. | ८३. | १-६ |
| ” | ” | ” | ७-१३$_{२}$ | | ” | ” | ” | ७$_{३}$-१३$_{२}$ |
| ” | ” | ” | १३$_{३,४}$ | | ” | ” | ” | १५$_{३,४}$ |
| ” | ” | ” | १४-२५ | | ” | ” | ” | १६-२७$_{२}$ |
| ” | ” | ” | २६-३६ | | ” | ” | ” | २८-३८$_{२}$ |
| ” | ” | ” | ३८$_{१,२}$ | | ” | ” | ” | ३८$_{३,४}$ |
| ” | ” | ” | ३९ | | ” | ” | ” | ३९ |
| ” | ” | ” | ४०-४४ | | ” | ” | ” | ४१$_{३}$-४५$_{६}$ |

उत्सवेषु च यज्ञान्ते लक्षहोमान्तरेऽपि च ।
शुक्लायां पञ्चदश्यां वा पुण्यर्क्षे वा विधानतः ॥ ८ ॥
धान्यशैलादयो देयाः कार्तिक्यां तीर्थसङ्गमे ।
तीर्थेष्वायतने वापि गोष्ठे वा भवनाङ्गणे ॥ ९ ॥
मण्डलं कारयेद्भक्त्या चतुरश्रमुदङ्मुखः ।
प्रागुदक्प्रवणे शुद्धे प्राङ्मुखो वा विधानतः ॥ १० ॥
गोमयेन तु लिप्तायां भूमावास्तीर्य वै कुशम् ।
तन्मध्ये पर्वतं कुर्यात् द्विकुम्भ ( विष्कम्भ ) पर्वतान्वितः ( तम्[२] ) ॥११॥
धान्यद्रोणसहस्रेण भवेद्वै विधिरुत्तमः ।
मध्यमः पञ्चशतिकः कनिष्ठः स्यात्त्रिभिः शतैः ॥ १२ ॥

मेरुर्महावृद्धिमतस्तु[३] मध्ये
सुवर्णवृक्षत्रयसंयुतः स्यात् ।
मूर्धन्यधस्तान्नवमश्मरेण
कार्यस्त्वमेकत्र पुनर्द्विजाद्याः ( ?[४] ) ॥ १३ ॥
चत्वारि शृङ्गाणि च राजतानि
नितम्बभागेष्वपि राजतं स्यात् ।
तथेक्षुवंशावृतकन्दरस्थं
घृतोदनप्रस्रवणश्च दिक्षु ॥ १४ ॥
शुक्लाम्बराण्यम्बुधवारिणि[५] ( ? ) स्यात्
[६]प्लवेन पातानिव ( ? ) दक्षिणेन ।
वासांसि पश्चादथ कन्दराणि[७]
रत्नानि[८] चैवोत्तरतो घनानि ॥ १५ ॥

---

२. मेरोः परितः चत्वारो विष्कम्भपर्वताः ; विष्णौ २. २. १६ : विष्कम्भा रचिता मेरोः ।

३. आ म '-व्रीहिमयस्तु' इति समीचीनः पाठः ।

४. आ. म. 'मूर्धन्यवस्थानममत्सरेण कार्यं त्वनेकैश्च पुनर्द्विजाद्यैः' इति समीचीनः पाठः ।

५. आ म 'अम्बुधरावली' ६. आ म. 'पूर्वेण पीतानि च'

७. आ. म. 'कर्बुराणि' ८. आ. म. 'रक्तानि'

रौप्यान् महेन्द्रप्रभृतीन् तथाष्टौ
संस्थाप्य लोकाधिपतीन् क्रमेण ।
नानाफलानां वसतिस्ततः स्यात्
मनोज्ञमाल्यानि विलेपनं च ॥ १६ ॥

वितानमद्र्युपरि पञ्चवर्ण-
मम्लानपुष्पाभरणं सितं वा ।
इत्थं निशम्यापरशैलमध्य-
मतस्तु विष्कु( ष्क )म्भगिरिक्रमेण ॥ १७ ॥

तुरीयभागेन चतुर्द( र्दि )शं च
संस्थापयेत् पुष्पविलेपनं च ।
पूर्वेण मन्दा( न्द )रमनेकफलेन वापी (वाऽपि)
युक्तैर्यवैः कनक तत्र( भद्र ? )कदम्बचिह्नम् ॥ १८ ॥

कायेन काञ्चनमयेन विराजमान-
माकारयेत्कुसुमवस्त्रविलेपनाढ्यम् ।
क्षीरारूपेण सहसा धवलेन[६] चैव
रौप्येण शुक्तिघटितेन विराजमानम् ॥ १९ ॥

याम्येन येन सदनो ( गन्धमदनो ) भुवि रा(यो ?)जनीयो
गोधूमसञ्चयमयं ( यः ) कलधौतजं( जो )वा ।
हो( है )मेन यक्षपतिना घृतमानसे च( न )
वस्त्रैश्च राजतध( व )नेन च संयुतः स्यात् ॥ २० ॥

पश्चात्तिलाचलमनेकसुगन्धिपुष्पैः
सौवर्णपिप्पलहिरण्मयगुल्मयुक्तम् ।
प्राकारयेद्रजतपुष्परसेन तद्वत्
वस्त्रान्वितं दधिसितोदसरस्तथाग्रे ॥ २१ ॥

---

६. आ. म. 'क्षीरारुणोदसरसाथ वनेन' इति समीचीनः पाठः । विष्णौ २. २. २५ : अरुणोदं नाम सरोऽत्रोक्तम् ।

संस्थाप्य तं पिप्पल( विपुल )[10] शैलमथोत्तरेण
शैलं सुपार्श्वमपि चाश्ममयं सवस्त्रम् ।
पुष्पैश्च हेमघट( वट[11] )पादपशेखरं च
प्राकारयेत्कनकधेनुविराजमानम् ॥ २२ ॥
माक्षीकमाव( भद्र )सर (सरसाथ[12])णेन (वनेन) तत्तद् (तद्वद्)-
रौप्येण भास्वरवता च युतं विधाय ।
होमं च तत्तिथि (चतुर्भिरथ ?) वेदपुराणविद्भि-
र्दान्तैरतीक्ष्णवनितागतिभिर्द्विजेन्द्रैः ॥ २३ ॥
पूर्वेण हस्तमितमत्र विधाय कुण्डं
कार्यं तिलैर्युतघृतेन समित्कुशैश्च ।
रात्रौ च जागरमनुव्रतगीततूर्यै-
राराधनं च कथयामि शिवोत्सवा(शिलोच्चया)नाम्[13] ॥२४॥
त्वं सर्वदेवगणधामनिधे विरुद्ध-
मस्मद्गृहेष्वमरपर्वत नाशयाशु ॥ २५ ॥
त्वमेव भगवानीशो ब्रह्मा विष्णुर्दिवाकरः ।
मूर्तामूर्तपदं बीजमतः पाहि सनातन ॥ २६ ॥
यस्माच्च लोकपालानां विश्वमूर्ति( र्ते )श्च मन्दिरम् ।
रुद्रादित्यवसूनां च तस्माच्छान्तिं प्रयच्छ मे ॥ २७ ॥
यस्माच्चाशून्यममरैर्नारीभिश्च शिरस्तव ।
तस्मान्मामुद्धराशेषदुःखसंसारसागरात् ॥ २८ ॥
एवमभ्यर्थितं मेरुं मन्दरं चापि पूजयेत् ।
तस्मा (यस्मा) चैत्ररथानन्य (रथेन त्वं?) भद्रासन (श्चेन) विशेषण (तः)॥२९॥

---

१०. मेरोः पश्चिमपार्श्वस्थः विष्कम्भपर्वतो विपुलो नाम । विष्णौ २. २. १७. पिप्पलस्तु तत्रस्थो वृक्षः । मातृकायामतो विपुलपिप्पलयोर्मोहः ।

११. वटस्त्वत्रस्थो वृक्षः । विष्णौ २. २. १७.

१२. चतुर्दिक्ष्वत्रत्येषु सरस्सु महाभद्रमित्येकम् । विष्णौ २. २. २५.

१३. आ. म. 'शिलोच्चयाना' मिति समीचीनः पाठः । अत्र शिवस्य वा तदुत्सवानां वा नास्ति प्रस्तावः । प्रस्तावस्तु शिलोच्चयानामेव ।

सौभगे (शोभसे) मन्दरक्षिप्रमतः क्षिप्रकरो भव ।
यस्माच्चूडामणिर्जम्बुद्वीपे त्वं गन्धमादन ॥ ३० ॥

गन्धर्ववंशगस्तावानतः कीर्तिर्दृढास्तु मे ।
यस्मात्त्वं केतुमालेन वैभ्राजेन बलेन (वनेन) वा ॥ ३१ ॥

हिरण्मयश्च ( ण्मयाश्वत्थ ) शिखरः ( शिराः ) तस्मात्पुष्टिर्दृढास्तु मे ।
उत्तरैः कुरुभिर्यस्मात् सावित्रेण बलेन ( वनेन ) च ॥ ३२ ॥

सुपार्श्व राजसे नित्यमतः श्रीरक्षयास्तु मे ।
एवमामन्त्र्य तान् सर्वान् प्रभाते विमले पुनः ॥ ३३ ॥

स्नात्वा तु गुरवे दद्यात् मध्यमं पर्वतोपमम् ( त्तमम् ) ।
विष्कु ( ष्क ) म्भपर्वतान् दद्यादृत्विग्भ्यः क्रमशो द्विजाः ॥ ३४ ॥

स्वरो[१४] दद्याच्चतुर्विंशमथवा दश द्वादश ।
शक्तितः पानीयं[१५] दद्यात् गां च दद्यात् पयस्विनीम् ॥ ३५ ॥

एकां च कपिलां दद्यात् गुरवे च पयस्विनीम् ।
[१६]नारायणं मण्डलेशं षोडशार्चैः समर्चयेत् ॥ ३६ ॥

आदिमध्यावसानेषु होमं कुर्यात् सहस्रकम् ।
चरुं कृत्वा विधानेन दिक्पालांश्च तथा ग्रहान् ॥३७॥

इक्षुपर्वैश्च श्रीखण्डैर्मोदकैः पायसैरपि ।
पर्वतानामशेषाणामेष एव विधिः स्मृतः ॥३८॥

त एव पूजने मन्त्राः त एवोपस्कराः स्मृताः ।
ग्रहाणां लोकपालानां क्रमशः शृणु सत्तमाः (?) ॥३९॥

दानकालेषु ये मन्त्राः पर्वतेषु यथाक्रमम् ।
अन्नं ब्रह्म यतः प्रोक्तम् अन्नं प्राणाः प्रकीर्तिताः ॥४०॥

---

१४. आ. म. 'गाश्च' कृत्यकल्पतरौ 'गाव'
१५. 'पञ्च वा' इति स्यात् । आ. म. 'पञ्च दद्यादशक्तिमान्'
१६. इत आरभ्य श्लोकद्वयं आ. म. नास्ति

अन्नाद्भवन्ति भूतानि जगदन्नेन वर्तते ।
अन्नमेव यतो लक्ष्मीरन्नमेव जनार्दनः ॥४१॥

धान्यपर्वतरूपेण पाहि तस्मान्नगोत्तम ।
अनेन विधिना यस्तु दद्याद्धान्यमयं गिरिम् ॥४२॥

मन्वन्तरशतं साग्रं देवलोके महीयते ।
अप्सरोगणगन्धर्वैराकीर्णेन विराजता ॥४३॥

विमानेन च वै स्वर्गमायाति च द्विजोत्तमाः ।
धर्मक्षये राजराज्यमाप्नोतीह न संशयः ॥४४॥

इति स्वल्पमत्स्ये..........दानधर्मे सप्तमोऽध्यायः ॥

[१]अथातः संप्रवक्ष्यामि लवणाचलमुत्तमम्[२] ।
मध्यमं स्यात्तदर्धेन चतुर्भिश्च कनिष्ठकम् ॥१॥
वित्तहीनो यथाभक्त्या द्रोणादर्धं तु कारयेत् ।
चतुर्थेन च विष्कु(ष्क)म्भपर्वतान् कारयेत् पृथक् ॥२॥
विधानं पूर्ववत्कुर्यात् ब्रह्मादीनां च सर्वदा ।
तद्वद्धेमतरून् सर्वान् लोकपालनिसेव(वेश?)नम् ॥३॥
सरांसि वनवृक्षाणि ऊर्ध्ववृत्ते निवेशयेत् ।
कुर्याज्जागरमत्रापि दानधर्मान्निबोधत ॥४॥
सौभाग्येन समुद्भूतो यतोऽयं लवणो वयः (रसः?) ।
तदात्मकेन(-त्मकत्वेन) च मां पाहि पापान्नगोत्तम ॥५॥
यस्मादन्नरसास्सर्वे लोकाश्च[३] लवणं विना ।
प्रियश्च सेवयेन्नित्यं[४] तस्माच्छान्तिं प्रयच्छ मे ॥६॥
विष्णुदेवैसमुद्भूतं यस्मादारोग्यवर्धनम् ।
तस्मात्पर्वतरूपेण पाहि संसारसागरात् ॥७॥

---

१. स्व. म. ८. १-७१. आ. म. ८४. १$_{१,२}$. २$_{३-४}$. ३-६,
८५ १-३, ४$_{३}$—७$_{२}$, ८, ६. ८, ९
८६. १, २, ४$_{२}$, ५-६,
८७. १, २, ४-६, ७$_{३-४}$.
८८. २, ३$_{३-४}$. ४, ५.
८९. १-१०
९०. १. २$_{१,२}$. ३, ४, ६-११
९१. १-४$_{२}$ ७$^{३}$-१०.
९२ १-३, ४$_{३}$-८, १०-१६$_{२}$

२. उत्तमस्य प्रमाणं नोक्तम् । आ. म ८४ अध्याये द्रष्टव्यम्

३. आ. म. 'उत्कटाः' । अत्र विरसपर्यायः शब्दोऽपेक्षितः

४. आ. म. 'शिवयोर्नित्यम्'

५. आ. म. 'देह'

अनेन विधिना यस्तु दद्याल्लवणपर्वतम् ।
उमालोके वसेत्कल्पं ततो याति परां गतिम् ॥८॥

अतः परं प्रवक्ष्यामि गुडपर्वतमुत्तमम् ।
यत्प्रदानान्नरः स्वर्गं प्राप्नोति सुरपूजितः ॥९॥

उत्तमो दशभिर्भारैः मध्यमः पञ्चभिर्मतः ।
त्रिभिर्भारैः कनिष्ठश्च तदर्धेनाल्पवित्तमः (-वान् ? ) ॥१०॥

तथैवामन्त्रणं पूजा तेन ब्रह्मसुरार्चनम् ।
विष्कु ( ष्क ) म्भपर्वतस्तद्वत् सरांसि वनदेवताः ॥ ११ ॥

धान्यपर्वतवत्कार्यमिमं मन्त्रमुदीरयन् ।
यथा देवेषु धर्मात्मा प्रवरोऽयं जनार्दनः ॥ १२ ॥

सामवेदस्तु वेदानां महादेवस्तु योगिनाम् ।
प्रणवः सर्वमन्त्राणां तन्त्राणां[६] पार्वती यथा ॥ १३ ॥

तथा रसानां प्रवरस्तथैवेक्षुरसो वरः ।
मम तस्मात्परां लक्ष्मीं ददस्व गुडपर्वत ॥ १४ ॥

निवासं ( सः ) चापि पार्वत्या तस्मान्मां पाहि सर्वदा ।
अनेन विधिना यस्तु दद्याद्गुडमयं गिरिम् ॥ १५ ॥

सम्पूज्यमानो गन्धर्वैर्गौरीलोके महीयते ।
पुनः कल्पशतान्ते तु सप्तद्वीपाधिपो भवेत् ॥
आयुरारोग्यसंपन्नः शत्रुभिश्चापि पूजितः ॥ १६ ॥

अथ पापहरं वक्ष्ये सुवर्णाचलमुत्तमम् ।
यस्य प्रसादाद्भवनं वैविन्ध्यं ( वैरिञ्चं ) यान्ति मानवाः ॥ १७ ॥

उत्तमः पलसाहस्रो मध्यमः पञ्चभिश्शतैः ।
तदर्धेनाधमस्तद्वदल्पवित्तोऽपि मानवः ॥
दद्यादेकपलादूर्ध्वं यथाशक्त्या विमत्सरः ॥ १८ ॥

---

६. आ. म. 'नारीणां' । अत्र स्वल्पमत्स्यपाठः 'तन्त्रिणां' इतिं स्यात् ।

नमस्ते ब्रह्मबीजाय ब्रह्मगर्भाय वै नमः ।
यस्मादग्नेरपत्यं त्वं यस्मादूर्ध्वं जगत्पतेः ॥ १९ ॥
हेमपर्वतरूपेण तस्मात्पाहि नगोत्तम ।
अनेन विधिना यस्तु दद्यात्कनकपर्वतम् ॥ २० ॥
स याति परमं ब्रह्मलोकं मानसवत्सरम् ( ? [७] ) ।
तत्र कल्पशतं तिष्ठेत्ततो याति परां गतिम् ॥ २१ ॥
अतः परं प्रवक्ष्यामि तिलशैलं विधानतः ।
यत्प्रसादान्नरो याति विष्णुलोकमनुत्तमम् ॥ २२ ॥
उत्तमो दशभिस्तालैः मध्यमः पञ्चभिर्मतः ।
त्रिभिः कनिष्ठो विप्रेन्द्राः तिलशैलः प्रकीर्तितः ॥ २३ ॥
यस्मान्मधुकरान् ( हराद् ? [८] ) विष्णोर्देहात्पूर्वं समुद्भवः ।
तिलाः कुशाश्च स ( श ) म्यश्च [९] तस्मात् शन्नो भवत्विह ॥ २४ ॥
हव्ये कव्ये च यस्माच्च तिला एव हि रक्षणम् ।
तस्मात्तद्वहु शैलेन्द्र तिलाचल नमोऽस्तु ते ॥ २५ ॥
इत्यामन्त्र्य च यो दद्यात्तिलाचलमनुत्तमम् ।
स वैष्णवपदं याति पुनरावृत्तिदुर्लभम् ॥ २६ ॥
पितृभिर्देवगन्धर्वैः पूज्यमानो दिवं व्रजेत् ।
कार्पासपर्वतः तद्वद्विंशभारैरिहोत्तमः ॥ २७ ॥
दशभिर्मध्यमः प्रोक्तः कनिष्ठः पञ्चभिर्मतः ।
भारेणाल्पधनो दद्यात् वित्तशाठ्यविवर्जितः ॥ २८ ॥
प्रभातायां तु शर्वर्यां दद्यादिदमुदीरयेत् ।
त्वमेवावरणं सर्वलोकानामिह सर्वदा ॥ २९ ॥
कार्पासाचल नमस्तस्मै अघौघध्वंसनो भव ।
इति कार्पासशैलेन्द्रं यो दद्यात् पर्वस [१०] न्निधौ ॥
[११] इन्द्रलोके वसेन्नित्यं ततो लोके भवेदिह ॥ ३० ॥

---

७. आ. म. 'आनन्दकारकम्' । ८. आ. म. 'मधुवधे' ।
९. आ. म. 'माषाश्च' ।
१०. आ. म. 'शर्व' । ११. आ. म. 'रुद्र' ।

अथातः संप्रवक्ष्यामि घृताचलमनुत्तमम् ।
तेजोमयामृतं दिव्यं महापातकनाशनम् ॥ ३१ ॥
विंशत्या घृतकुम्भनामुत्तमः स्याद्घृताचलः ।
दशभिर्मध्यमः प्रोक्तः कनिष्ठः पञ्चभिर्मतः ॥ ३२ ॥
अल्पवित्तोऽपि कुर्वीत द्वाभ्यामेव विधानतः ।
विष्कु ( ष्क ) म्भपर्वतान् तद्वच्चतुर्भागेन कल्पयेत् ॥ ३३ ॥
[१२]कर्षतौलिकमानेन पलं देयं घृतस्य च ।
पञ्चविंशपलैः कुम्भं कार्पासद्विगुणं स्मृतम् ॥ ३४ ॥
षष्टिपलैश्च भारः स्यात् कार्पासस्य द्विजोत्तम ।
शालितण्डुलपात्राणि कुम्भोपरि निवेशयेत् ॥ ३५ ॥
कारयेत् संहतानुच्चान् यथाशोभं विधानतः ।
वेष्टयेच्छुक्लवासोभिरिक्षुदण्डक(फ)लादिकैः ॥३६॥
धान्यपर्वतवत् सम्यक् विधानमिह पठ्यते ।
अधिवासनपूर्वं हि तद्वद्धोमसुरार्चनम् ॥३७॥
प्रभातायां तु शर्वर्यां गुरवे विनिवेदयेत् ।
विष्कु(ष्क)म्भपर्वतं तद्वद्दत्विग्भ्यः शान्तमानसः ॥३८॥
संयोगाद्घृतमुत्पन्नं यस्मादमृततेजसोः ।
तस्माद्घृताद्धि विश्वात्मा प्रीयतामिति शङ्करः ॥३९॥
तस्मात्तेजोमयं ब्रह्म घृते तच्च व्यवस्थितम् ।
घृतपर्वतरूपेण तदेव पाहि भूधर ॥४०॥
अनेन विधिना दद्यात् घृताचलमनुत्तमम् ।
महापातकयुक्तोऽपि लोकमायाति शाङ्करम् ॥४१॥
हंससारसयुक्तेन किङ्किणीजालमालिना ।
विमानेनाप्सरोभिश्च सिद्धविद्याधरैर्युतः ॥
विचरेत् पितृभिः सार्धं यावदाहु (भू )तसंप्लवम् ॥४२॥

---

१२. अत्र आ. म. अदृष्टमर्धत्रयं दृश्यते ।

अतः परं प्रवक्ष्यामि रत्नाचलमनुत्तमम् ।
मुक्ताफलसहस्रेण पर्वतः स्यादथोत्तमः ॥४३॥
मध्यमः पञ्चशतिकः त्रिशतेनाधमः स्मृतः ।
पूर्वे रजतमत्रादौ दक्षिणेनेन्द्रनीलकौ ॥४४॥
पुष्पदन्त (राग ?)युतः कार्यो विद्वद्भिर्गन्धमादनः ।
वैदूर्यवज्रमेदस्य संमिश्रो विद्युता(विपुला)चलः ॥४५॥
पद्मरागसमो वर्णैरुत्तरेणापि विन्यसेत् ।
पूजयेत्पुष्पपानीयैः प्रभाते स्याद्विसर्जनम् ॥४६॥
पूर्ववद्गुरुऋत्विग्भ्य इमं मन्त्रमुदीरयेत् ।
तथा देवगणाः सर्वे सर्वरत्नेष्ववस्थिताः ॥
त्वं च रत्नमयो नित्यमतः पाहि महाचल ॥४७॥
यस्माद्रत्नप्रसादेन वृष्टिं (तुष्टिं ?) प्रकुरुते हरिः ।
सदा रत्नप्रसादेन तस्मान्नः पाहि सर्वतः ॥४८॥
अनेन विधिना यस्तु दद्याद्रत्नमयं गिरिम् ।
स याति वैष्णवं लोकममरासुरपूजितः ॥४९॥
यावत्कल्पशतं साग्रमुषित्वेह द्विजोत्तमाः ।
रूपारूप्य(रोग्य)गुणोपेतः सप्तद्वीपाधिपो भवेत् ॥५०॥
ब्रह्महत्यादिकं किञ्चिदिहामुत्र यथाकृतम् ।
तत्सर्वं नाशमायाति गिरिर्वज्रहतो यथा ॥५१॥
अतः परं प्रवक्ष्यामि रौप्याचलमनुत्तमम् ।
यत्प्रदानान्नरो याति सोमलोकं द्विजोत्तमाः ॥५२॥
दशभिः पलसाहस्रैरुत्तमो रजताचलः ।
पञ्चभिर्मध्यमः प्रोक्तस्तदर्धेनाधमः स्मृतः ॥५३॥
अशक्तो विंशतेरूर्ध्वं कारयेद्भक्तितः सदा ।
विष्कु(ष्क)म्भपर्वतस्तद्वत्तुरीयांशेन कल्पयेत् ॥५४॥
पूर्ववद्राजतान् कुम्भान् मन्दराद्रीन् विधानतः ।
इमं मन्त्रं पठन् दद्यात् दर्भपाणिर्विमत्सरः ॥५५॥

पितॄणां वल्लभं यस्माद्धर्मेन्द्वोः शङ्करस्य च ।
रजतं पाहि तस्मान्नः शोकसंसारसागरात् ॥५६॥
इत्थं नियम्य यो दद्याद्रजताचलमुत्तमम् ।
गवामयुतदानस्य फलं प्राप्नोति मानवः ॥५७॥
सोमलोके सगन्धर्वकिन्नराप्सरसां गणैः ।
पूज्यमानो वसेद्धीमान् यावदाहू (भू )तसंप्लवम् ।
अथातः संप्रवक्ष्यामि शर्कराचलमुत्तमम् ।
यस्य प्रसादाद्विष्णुर्वै रुद्रास्तुष्यन्ति सर्वदा ॥५९॥
अष्टभिः शर्कराभारैरुत्तमः स्यान्महाचलः ।
चतुर्भिः मध्यमः प्रोक्तो भारौ द्वावधमः स्मृतः ॥६०॥
भारे तस्यार्धमानेन यः कुर्यात्स्वल्पवित्तवान् ।
विष्कु(ष्क)म्भपर्वतान् कुर्यात् तुरीयांशेन मानवः ॥६१॥
मेरोरुपरि तद्वच्च स्थाप्यं हेमतरुत्रयम् ।
मन्दारः पारिपात्र(जात)श्च तृतीयः कल्पपादपः ॥६२॥
तद्वद्वृक्षत्रयं मूर्ध्नि सर्वेष्वपि निवेद(श)येत् ।
हरिचन्दनसन्तानौ पूर्वपश्चिमभागयोः ॥६३॥
निवेश्यौ सर्वशैलेषु विशेषः शर्कराचले ।
मन्दा(न्द)रे कामदेवस्तु प्रत्यङ्मुखः सदा भवेत् ॥६४॥
गन्धमादनशृङ्गे तु धनदः स्यादुदङ्मुखः ।
प्राङ्मुखो हेमयुक्तस्तु हंसः स्याद्विपुलाचले ॥६५॥
हैमासु(हैमेषु)पार्श्वेषु भवेत् सुरभिर्दक्षिणामुखी ।
सौभाग्यामृतसारोऽयं परमः शर्कराचलः ॥६६॥
तस्मादनन्तकारी त्वं भव शैलेन्द्र सर्वदा ।
अमृतं पिबतां ये तु पतिता भुवि शीकराः ।
देवानां च (तत्-)समुत्थोऽयं पाहि नः शर्कराचल ॥६७॥
मनोभवतनोर्मध्यादुद्धृता शर्करा यतः ।
तन्मयोऽसि महाशैल पाहि संसारसागरात् ॥६८॥

योऽदद्यात् शर्कराशैलमनेन विधिना नरः ।
सर्वपापविनिर्मुक्तः स याति ब्रह्ममन्दिरम् ॥६९॥

चन्द्रादित्यार्कसंकाशमधिरुह्यानुजीवितम् (जीविभिः) ।
स हैमयानमुत्तिष्ठेत् स च विष्णुप्रभो(ः)दिवम् ॥७०॥

ततः कल्पशतान्ते तु सप्तद्वीपाधिपो भवेत् ।
आयुरारोग्यसंपन्नो यावज्जन्मायुतत्रयम् ।
भोजनं शक्तितः कुर्यात् सर्वशैले विमत्सरः ॥७१॥

इति स्वल्पमत्स्यपुराणे षट्पादकार्या(?)साहस्रे
दानविधौ अष्टमोऽध्यायः ॥

मत्स्य उवाच—

[१]नोक्तानि यानि गुह्यानि महादानानि षोडश ।
तानि च संप्रवक्ष्यामि यथावदनुपूर्वशः ॥१॥

महादानानि देयानि संसारभयभीरुणा ।
अनित्यं जीवनं यस्माद्वसुधातीव चञ्चला ॥२॥

केशेष्विव गृहीतेषु मृत्युना धर्ममाचरेत् ।
सुवर्णमेरुतं[२]ः(?)कृत्वा पञ्चरत्नसमन्वितम् ॥३॥

तुलाधृतं चैकतश्च यजमानं सपत्नीकम् ।
अथवाष्टलोहमयं[३]मथवा रत्नसंम(मि?)तम् ॥४॥

अथवा रत्नसंयुक्तमथवा व्रीहिणा युतम् ।
यच्च भवेत् कलारूपं धान्यैं[४]रत्नानि(?)वा युतम् ॥५॥

पुरुषष्टौ (षाष्ट ?)[५] महादानं प्रदद्यान्मकरे रवौ ।
विषुवे अयने वापि जन्मर्क्षे मृत्युसङ्कटे ॥६॥

---

१. स्व. म. ६. १. = आ. म. २७८.१८
   ,, ,, ,, २ = ,, ,, ,, २३$_{३}$-२४$_{२}$
   ,, ,, ,, ३$_{१,२०}$ = ,, ,, ,, २४$_{३,४}$
   ,, ,, ,, ११$_{३}$-२३$_{४}$ = ,, ,, ,, ५६$_{३}$-७२$_{२}$
   ,, ,, ,, २४-२६ = ,, ,, ,, ७३-७८

२. सुवर्णमेरुदानं विवक्षितमिति भाति

३. अष्टधातुयुतदानविषये दानसागरे द्रष्टव्यम्; तथा दानमयूखे तुलापुरुषदानप्रयोगप्रकरणे बहुविधद्रव्ययुतमिदं दानं प्रपञ्चितं द्रष्टव्यम्।

४. रत्नैरिति तृतीया अपेक्षिता अत्र ।

५. अष्टद्रव्यैः पुरुषेण सह तुलाधृतैः दानं विवक्षितम्। अष्टद्रव्याणि च ताम्रं, सुवर्णं, रजतं, तिलः, व्रीहिः, यवः, यवान्नम्, अष्टमं तु न स्पष्टम्; शुद्धान्नमेकं, यवादिधान्यमिश्रमेकमिति स्यात् ।

प्रथमं ताम्रपुरुषं सौवर्णमपि राजतम् ।
तिलव्रीहियवं धान्यमन्नं च यवसंभवम् ॥७॥

[६]क्षीरिवृक्षसमं युतं ( समायुक्तं ) चतुर्हस्तप्रमाणतः ।
रोपयेद्दण्डयुग्मं च चरकादनकान्वितम्(?) ॥८॥

तुलादण्डं वामहस्तं त्रिहस्तं तस्य मण्डलम् ।
[७]वेद (दीं?) वज्रान्वितं (तां?) कुर्याद्धातृ(तु?)राजविनिर्मितम् (ताम्?) ॥९॥

[८]पट्टपट्टमयं चापि लताशाटान्वितं च वा ।
तुलान्ते कुम्भसंयुक्तं किङ्किण्यन्ता(न्त?) विभूषितम् ॥१०॥

दण्डमध्येऽपि तद्वत् स्यात् पूजामन्त्रं शृणु द्विजाः ( ? ) ।
नमस्ते सर्वदेवानां शक्तिस्त्वां च समाश्रिता ॥
साक्षीभूतजगद्धात्रा निर्मिता विश्वयोनिना ॥ ११ ॥

एकतः सर्वतत्त्वानि तथानृतग (श?) तानि च ।
धर्माधर्मकृतं ( तां ? ) मध्ये स्थापितानि (सि ?) जगद्द्विजाः[९] ॥

त्वं तुले सर्वभूतानां प्रमाणमिह कीर्तिता ।
मां तोलयन्ती संसारादुद्धरस्व नमोऽस्तु ते ॥ १३ ॥

योऽसौ तत्त्वाधिपो देवः पुरुषः पञ्चविंशकः ।
स एवाधिष्ठितो देवि त्वयि तस्मान्नमोऽस्तु ते ॥ १४ ॥

नमो नमस्ते गोविन्द तुलापुरुषसंज्ञक ।
त्वं हि तारय मामस्मात् सर्वकल्मषकर्दमात् ॥ १५ ॥

पुण्यकालं समासाद्य त्वयैव ( कृत्वैव )मधिवासनम् ।
पुनः प्रदक्षिणं कृत्वा तुलामारोहयेद्बुधः ॥ १६ ॥

---

६. आ. म. २७४. ३११-२. द्वारेषु कार्याणि च तोरणानि चत्वार्यपि क्षीरवनस्पतीनाम्

७. वेद्यां दशविधायुधनिवेशनं चतुर्वर्गचिन्तामणावुद्धृतम्; च. चि. दान० पृ. १९४. ५.

८. आ. म. २७४. ३४१.

९. आ. म. जगद्धिते ; हेमाद्र्युद्धृतमत्स्यपाठे 'जगत्प्रिये' इति ।

खड्गचर्मसमायुक्तः सर्वाभरणभूषितः ।
धर्मराजमथादाय हेमसूर्येण संयुतः ॥ १७ ॥

कराभ्यामूर्ध ( ध्वं ) मुष्टिभ्यामास्ते पश्यन् हरेर्मुखम् ।
ततो हारतुलाधारो निश्शेष ( न्यसेयुः ) द्विजपुङ्गवाः ॥ १८ ॥

मासा ( समा ) दभ्यधिकं यावत् काञ्चनं चापि निर्मलम् ।
[10]पुष्टिकामुष्टि ( ? ) कुर्वीत पुष्टिकामो नरेश्वर ॥ १९ ॥

क्षणमात्रं ततः स्थित्वा पुनरेवमुदीरयेत् ।
नमस्ते सर्वभूतानां साक्षिभूते सनातनि ॥ २० ॥

पितामहेन देवि त्वं निर्मले ( निर्मिता ) परमेष्ठिना ।
त्वया धृतं जगत्सर्वं बहिः स्थावरजङ्गमम् ॥ २१ ॥

सर्वभूतात्मभूतान्त ( न्ते ? )[11] नमस्ते विश्वधारिणे ( णि ? )
ततोऽवतीर्य गुरवे पूर्वमर्धं निवेदयेत् ॥ २२ ॥

ऋत्विग्भ्योऽपरमर्धं तु दद्यादुदकपूर्वकम् ।
गुरवे ग्रामरत्नानि ऋत्विग्भ्यश्च निवेदयेत् ॥ २३ ॥

दीनानाथविशिष्टादीन् पूजयेद्ब्राह्मणैस्सह ।
न चिरं धारयेद्देहे हेम संप्रोक्षितं बुधः ॥ २४ ॥

स तिष्ठेत् परमं स्थानं शोकव्याधिहरं नृणाम् ।
शीघ्रं परस्वीकरणात् श्रियमाप्नोति पुष्कलम् ॥ २५ ॥

अनेन विधिना यस्तु तुलापुरुषमाचरेत् ।
प्रतिलोकाधिपस्थाने प्रतिमन्वन्तरं वसेत् ॥ २६ ॥

विमानेनार्कवर्णेन वर्चसा गुणशालिना ।
पूज्यमानोऽप्सरोभिश्च ततो विष्णुपुरं व्रजेत् ॥
कल्पकोटिशतं यावत् तस्मिन् लोके महीयते ॥ २७ ॥

---

१०. आ. म. २७४. ६८ १,२. पुष्टिकामस्तु कुर्वीत भूमिसंस्थं नरेश्वरः ।
११. आ. म. °भूतस्थे

कर्मक्षयादिति पुनर्भुवि राजराजो
भूपालमौलिमणिरञ्जितपादपद्मः ।
श्रद्धान्वितो भवति यज्ञसहस्रयाजी
बाहुप्रतापजितसर्वमहीशलोकः ॥ २८ ॥

यो दीयमानमपि पश्यति धर्मयुक्तः
कालान्तरे स्मरति वाचयतीह लोके ।
यो वा शृणोति पठतीन्द्रसमानरूपः
प्राप्नोति संशमवशं ( ? ) नरदेवयु( जु )ष्टम्[१२] ॥ २९ ॥

इति स्वल्पमत्स्यपुराणे...तुलापुरुषे नवमोऽध्यायः ।

---

१२. आ. म. प्राप्नोति धाम स पुरन्दरदेवजुष्टम् ।

श्रीभगवानुवाच—

[१]अथातः संप्रवक्ष्यामि महादानमनुत्तमम् ।
नाम्ना हिरण्यगर्भाख्यं महापातकनाशनम् ॥१॥

पुण्यं दिनं समासाद्य तुलापुरुषदानवत् ।
ऋत्विङ्मण्डपसंभारभूषणाच्छादनादिकम् ॥२॥

कुर्यादुपोषणं तद्वल्लोकसाधारणं बुधः ।
पुण्याहवाचनं कृत्वा तद्वत्कृता(त्वा ?)धिवासनम् ॥३॥

ब्राह्मणैः खनयेत्कुण्डं[२] तपनीयमयं शुभम् ।
आसप्तत्वगुणोच्छ्रायं[२a] हेमपङ्कजगर्भवत् ॥४॥

त्रिभागहीनं विस्तार आज्यक्षीरादिपूरितम् ।
दशद्रौणि सरत्नानि पात्रं शुचि तथैव च ॥५॥

---

१. स्व. म. १०. १-$८_{२}$ = आ म २७५ १—$८_{२}$
" " " $८_{३ ४}$ = " " " $९_{१.२}$
" " " $९_{३}$-११ = " " " ११—१३
" " " १२ = " " २७६.१
" " " $१३_{१.२}$ = " " " $२_{१ २}$
" " " २१-२४ = " " " ७, $१०_{३.४}$ $११_{१.६}$ $१३_{१.२}$
" " " २६ = " " " २७९.१.
" " " २७ = " " " $३_{३,४}$. $४_{३,४}$. $७_{१,२}$
" " " २८ = " " " २८०.१
" " " $२९_{३ ४}$ = " " " $५_{१,२}$
" " " ३०-३४ = " " " $५_{३}$-१०
" " " ३५ = " " २८२.१
" " " ३७ = " " २८३.१

२. आ. म. आनयेत्कुम्भं। २a. आ. म. द्विसप्तत्यङ्गुलोच्छ्रायं।

हेममालं सपिटकं रवि³रादित्यसंयुतम् ।
तथाप्युपस्करं चैव सोपवीतं सकाञ्चनम् ॥६॥
पार्श्वतः स्थापयेत्तद्वद्धेमकुण्डकमण्डलम् ।
पद्माकरपिधानं स्यात् समन्तादङ्गुलाधिकम् ॥७॥
मुक्तावलीसमोपेतं पद्मरागदलान्वितम् ।
ततो मङ्गलशब्देन ब्रह्मघोषवरेण च⁴ ॥८॥
पूजापूर्वकमुत्सृज्य मन्त्रमेतदुदीरयेत् ।
नमो हिरण्यगर्भाय हिरण्यकवचाय च ॥९॥
सर्वलोकसुधा(रा ?)ध्यक्ष जगद्धात्रे नमो नमः ।
भूर्लोकप्रमुखा लोकास्तव गर्भे व्यवस्थिताः ॥१०॥
नमस्ते भुवनाधार नमस्ते भुवनाश्रय ।
नमो हिरण्यगर्भाय रत्नगर्भाय वै नमः ॥११॥
अथातः संप्रवक्ष्यामि ब्रह्माण्डविधिमुत्तमम् ।
यत् श्रेष्ठं सर्वदानानां महापातकनाशनम् ॥१२॥
पुण्यं दिनं समासाद्य वृद्धिश्राद्धं समाचरेत् ।
मातॄणां पूजनं कृत्वा कोष्ठषोडशकं लिखेत् ॥१३॥
तन्मध्ये च त्रिकोणं स्यात् तद्बाह्ये वलयत्रयम् ।
शुक्लवर्णेन रचयेत् पदेषु कलशः(शं ?) क्रमात् ॥१४॥
पीठेशानपि तच्छक्तीः गणेशं कलशेऽर्चयेत् ।
⁵द्विकुम्भेषु च दिक्पालान् स्वस्तिकेषु तथा ग्रहान् ॥१५॥
दम्पती पूजयेत्पूर्वं दिग्गजांश्च विशेषतः ।
सुवर्णं रजतं ताम्रमेकैकस्य पलं पलम् ॥१६॥
तदर्धेन तदर्धेन वित्तशाठ्यं न कारयेत् ।
मध्यकुम्भे विनिक्षिप्य पञ्चरत्नसमन्वितम् ॥१७॥

---

३. आ म. बहि॰ । ४. आ॰म रवेण च ।
५. कुम्भद्वये इत्यर्थः ।

शालग्रामं न्यसेत्पूर्वे कयान ऋचमीरयन् ।
लिप्यक्षरं तथाग्नेये मधुवातेति संस्मरन् ॥१८॥
याम्ये स्वर्णं स्फटिकं च कुशावल्केति[६] संपठन् ।
पञ्चव्रीहींश्च नैर्ऋते यज्जाग्रत ऋचा स्मरन् ॥१९॥
आदित्येति च मन्त्रेण ईशाने सैसकं न्यसेत् ।
ईशे (इषे ?) त्वेति च संजप्वा स्वगृह्योक्तविधानतः ॥२०॥
कौशेयवस्त्रसंवीतं तिलद्रोणेऽपि विन्यसेत ।
तथाष्टादश धान्यानि समन्तात्परिकल्पयेत् ॥ २१ ॥
स्थापयेद्वस्त्रसंवीतान् पूर्णकुम्भान् दशैव तु ।
दशैव धेनवो देयाः सहेमाम्बरदोहनाः ॥ २२ ॥
पादुकोपानहच्छत्रचामरासनदर्पणाः ( णैः ? ) ।
भक्ष्यभोज्यान्नदीपेक्षुफलमाल्यानुलेपनैः ॥ २३ ॥
नमोऽस्तु विश्वेश्वर विश्वधाम जगत्सवित्रे भगवन्नमस्ते ॥ २४ ॥
विभज्य सप्तधा दद्याद्दीनेषु कृपणेषु च ।
भागैकं गुरवे दद्यात् सर्वसंसारमोचनम् ॥ २५ ॥
अथातः संप्रवक्ष्यामि कामधेनुविधिं परम् ।
सर्वकामफलं नृणां महापातकनाशनम् ॥ २६ ॥
काञ्चनाशीतिशुद्धस्य धेनुरत्नं च कारयेत् ।
वेद्यां कृष्णाजिनं न्यस्य तिलप्रस्थसमन्वितम् ॥
तथाष्टादश धान्यानि समन्तात् परिकल्पयेत ॥ २७ ॥
अथातः संप्रवक्ष्यामि हिरण्याश्वविधिं परम् ।
अस्य प्रसादाद्विप्रेन्द्रा अनन्तं फलमश्नुते ॥ २८ ॥
हेमवाजिमयं कुर्यात् पौलान्त्ये पतिरेव च ( ? ) ।
शक्तितः त्रिपलादूर्ध्वं पलैकेनापि शक्तितः ॥ २९ ॥
पादुकोपानहं( ह )छत्रं( त्र )चामरासनभाजनैः ।
पूर्णकुम्भाष्टकोपेतं मालेक्षुफलसंयुतम् ॥ ३० ॥

---

६. को मन्त्रोऽभिप्रेत इति न ज्ञायते ।

शय्यां सोपस्करां तद्वद्धेममार्तण्डसंयुत ( ता ? ) म् ।
ततः सर्वौषधिजलैः स्नापितैर्देवपुङ्गवैः[७] ॥ ३१ ॥
इममुदीरयेन्मन्त्रं गृहीतकुसुमाञ्जलिः ।
नमस्ते देवदेवेश वेदाभ ( ह ? )रणलिप्सवः( ०प्सुना )[८] ॥
वाजिरूपेण मामस्मात् पाहि संसारसागरात् ॥ ३२ ॥
त्वमेव सप्तधातृणां ( सप्तधा भूत्वा ) छन्दोरूपेण भास्करम् ( र ? ) ।
यस्माद्भ्रामयसे[९] लोकान् ततः पाहि सनातन ॥ ३३ ॥
एवमुच्चार्य गुरवे सर्वस्वं विनिवेदयेत् ।
तद्वत्पापक्षयाद्भानोर्लोकमभ्येति शाश्वतम् ॥ ३४ ॥
अथातः संप्रवक्ष्यामि हेमहस्तिमयं शुभम् ।
यस्य प्रसादाद्भवनं वैष्णवं याति मानवः ॥ ३५ ॥
हेमसिंहमयं चैवं वृषं हेममयं तथा ।
अष्टनागं सुवर्णस्य लोहाष्टकमयस्य वा ॥
देवेभ्यो वापि विप्रेभ्यः सोऽनन्तं फलमश्नुते ॥ ३६ ॥
अतः परं प्रवक्ष्यामि महादानमनुत्तमम् ।
पञ्चलाङ्गलकं नाम महापातकनाशनम् ॥ ३७ ॥
स्वर्णरूप्यमयं कुर्यात् ताम्रस्य च पलाष्टकैः ।
अथवा दारुघटितं त्रिषु वर्णेषु भूषितम् ॥ ३८ ॥
विश्वचक्रं स्वर्णचक्रं त्रिशूलं शङ्खमेव च ।
दर्पणं व्यजनं छत्रमत्र श्राद्धं विवर्जयेत् ॥ ३९ ॥
*दरिद्रः खलु यो दद्यात्तिलधेनुं[१०] विधानतः ।
गोमयेनोपलिप्याथ तत्र धेनुं समालिखेत् ॥ ४० ॥

---

७. आ. म. °र्वैद ८. आ. म. °लम्पट ९. आ. म °द्धासयसे

* स्व. म. १०. ४० = कृत्यकल्पतरु पृ. १५२. प. १५, १६

१०. आ. म. तिलधेनुर्नास्ति । अस्ति कृत्यकल्पतरौ ; दान° पृ० १५२ ; च. चि. पृ० ४०५ ; किन्तु तत्र उभयत्र स्वल्पमत्स्यस्था एव श्लोकाः आदित्यपुराणादित्युद्धृताः ।

तिलैः कार्यं च सर्वाधं[११] तिलधेनुं प्रकल्पयेत् ।
खुरेषु चैवं शृङ्गेषु देयं कनकमेव च ।
[१२]सतिलां गां दक्षिणां च ब्राह्मणाय निवेदयेत् ॥ ४१ ॥

एवं धेनुं प्रयच्छेद्यः स्वर्गलोकं स गच्छति ।
ऋणैः सर्वैः प्रमुच्येत कर्मणा मनसाञ्चितैः ॥ ४२ ॥

तिलसंख्या तु यावद्वै तावत्कोटिशतानि च ।
मोदते तत्र वर्षाणां स्वर्गलोके न संशयः ॥ ४३ ॥

अथ मानुष्यमायाति कदाचित् कालपर्ययात् ।
धनधान्यसमृद्धिमान् जायते श्रीमतां कुले ॥ ४४ ॥

[१३]सदक्षिणां काञ्चनचारुशृङ्गीं
कांस्योपदोहां द्रविणान्तरीयाम् ।
धेनुं तिलानां ददतां द्विजातये
तेषां तु लोकाः सुलभा भवन्ति ॥ ४५ ॥

धेन्वाः प्रमाणेन समप्रमाणं
धेनुं तिलानामपि च प्रदाय ।
दीनाय विप्राय यमस्य लोके
न यातनां कांचिदुपैति मर्त्यः ॥४६॥

[१४]यावद्वत्सस्य द्वौ पादौ मुखं योनौ प्रदृश्यते ।
तावद्गौः पृथिवी तुल्या यावद्गर्भं न मुञ्चति ॥४७॥

---

११. कृत्यकल्पतरौ 'सर्वाङ्गं' ।
१२. स्व. म १०. ४१ = कृत्यकल्पतरु पृ. १५३. प. १, २, ३.
" " " ४२ = " " " " ४, ५
" " " ४३ = " " " " ६, ७
" " " ४४ = " " " " ८, ९
" " " ४५ = " " " " ११-१४
१३. कृत्यकल्पतरौ महाभारतादिति ।
१४. या. स्मृतौ. आचार. दान. २०७ । कृत्यकल्पतरौ दान. पृ० १५८

यो ददाति बलीवर्दं युक्तेन विधिना नरः ।
अभ्यङ्गं गोप्रदानान्ते तदेव फलमश्नुते ॥४८॥

दशधेनुप्रदानेन तुल्यैका कपिला मता ।
दानं सर्वं वरं दत्वा दशधेनुप्रदो भवेत् ॥४९॥

[15]हेमशृङ्गीं रौप्यखुरां ताम्रकांस्यसमन्विताम् ।
[16]गां दत्वा स्वर्गमायाति गृहीत्वा च द्विजर्षभाः ॥५०॥

तावन्नरक(?)मायाति यावद्गोलोमसंख्यया ।
सवत्सां कपिलां दत्वा दशवंश्यान् समुद्धरेत् ॥५१॥

होमार्थमग्निहोत्रस्य यो गां दद्यादयाचिताम् ।
त्रि(:) वृत्ता (वित्त)[17]पूर्णा पृथिवी तेन दत्ता न संशयः ॥५२॥

समानरूपां कपिलां धेनुं दद्यात्पयस्विनीम् ।
सुवत्सां वस्त्रसंवीतामग्निलोके महीयते ॥५३॥

पाण्डुकम्बलकर्णान्तां सवत्सां कांस्यदोहदाम् ।
प्रदाय वस्त्रसंवीतां साध्यानां लोकमश्नुते ॥५४॥

समानवत्सां श्वेतां च सर्वस्वैरपि संयुताम् ।
गन्धर्वाप्सरसां लोकान् ददद्प्नोति मानवः ॥५५॥

---

१५. या. स्मृतौ. आचार. दान. २०४

१६. स्व म. १०.४६ = कृत्यकल्पतरु पृ. १५३. प. १६. १७, पृ. १५४. प. १, २
" " " ४७ = " " १५८ " ९, १०.
" " " ४८ = " " " " १६, १७
" " " ४९ = " " " " २१, पृ. १५९. प. २.
" " " ५० = " " १५९ " ४.
" " " ५१$_{३,४}$ = " " १५९ " ५.
" " " ५२ = " " " " ११, १२.
" " " ५३ = " " १६३ " १२, १३
" " " ५४ = " " १६४ " १६ }
१६५ " १ }
" " " ५५ = " " " " ३

१७. च. चिन्तामणौ पृ० ४२०.

[17a]भोगसौख्यप्रदा श्वेता धूम्रता (धूम्राभा) तापनाशिनी ।
कृष्णा स्वर्गप्रदा ज्ञेया गौरी च कुलवर्धिनी ॥५६॥

रक्ता रक्तप्रदा ज्ञेया पीता दारिद्र्यघातिनी ।
पुत्रप्रदा कृष्णसारी नीला धर्मविवर्धिनी ॥५७॥
कपिला सर्वपापघ्नी नानावर्णा च मोक्षदा ।
प्रेतोदकी(पीतोदकां)[18] या च नृणां (जग्धतृणां) भग्नदेहां न दापयेत् ॥५८॥
उन्मत्तामङ्गहीनां च मृतवत्सामहायनीम्(त्सां महाशनाम्?)[19] ।
केशचेलपुरीषास्थिकव्यादीं सन्धिनीं च गाः(गाम्?)[20] ॥५९॥
[21]सिंहप्रसूतवत्सां च नित्यं प्रगलितस्तनीम् ।
[22]न दद्याद्ब्राह्मणेभ्यश्च सदोषं वृषभं तथा ॥६०॥
फालकृष्टां महीं दत्त्वा सबीजां बीजशालिनीम् ।
यावत्सूर्यकृता लोकास्तावत् स्वर्गे महीयते ॥६१॥
यस्तु गोष्पदमात्रं तु प्रयच्छति वसुन्धराम् ।
स नन्दनवनं याति विमाने सूर्यवर्चसम् ॥६२॥
अपि गोचर्मम[23]त्रेण सम्यग्दत्तेन मानवः ।
धौतपापो विशुद्धात्मा स्वर्गलोके महीयते ॥६३॥

---

१७a. कृत्यकल्पतरौ पृ० १६८, ब्रह्मपुराणादिति ।
१८. कृत्यकल्पतरौ पृ० १६९, ब्रह्मपुराणादिति । १९. च. चिन्तामणौ पृ०४४८
२०. च. चिन्तामणौ 'खलाम्' २१. सिंहमास इत्यर्थः ।
२२. स्व. म. १०. ५६-६३ = कृत्यकल्पतरु पृ. १६८. १५-१६९.६.
" १८७. ५-१०.
२३. गोचर्मशब्दः गोष्पदवत् प्रदीयमानाया भूमेः परिमाणवाची । स च परिमाणविशेष उपरि ६४ श्लोके प्रोक्तः । तथा आ. म. २८३. १४-१६. 'दण्डेन सप्तहस्तेन त्रिंशद्दण्डं निवर्तनम् । त्रिभागहीनं गोचर्ममानमाह प्रजापतिः ॥ मानेनानेन यो दद्यान्निवर्तनशतं बुधः । विधिनानेन तस्याशु क्षीयते पापसंहतिः ॥ तदर्धमथवा दद्यादपि गोचर्ममात्रकम् । भवनस्थानमात्रं वा सोऽपि पापैः प्रमुच्यते ॥' कृत्यकल्पतरौ च दान. पृ. १६१, आदित्यपुराणवचनम्—यस्तु गोचर्ममात्रां वै प्रयच्छति वसुन्धराम् । वाचस्पत्ये महाभारत ( अनुशासन ) वचनम्—अपि गोचर्ममात्रेण भूमिदानेन पूयते । गोचर्मपरिमाणं च बृहस्पत्युक्तं यथा—सप्तहस्तेन दण्डेन त्रिंशद्दण्डैर्निवर्तनम् । दश तान्येव गोचर्म ब्राह्मणेभ्यो ददाति यः ॥ वासिष्ठोक्तं गोचर्मपरिमाणं तु तत्रैवोद्धृतम् । यथा—दशहस्तेन वंशेन दशवंशान् समन्ततः । पञ्च चाभ्यधिकान् दद्यादेतद्गोचर्म चोच्यते ॥

[24] दशहस्तेन दण्डेन त्रिंशद्दण्डानि वर्तुलम् ।
दश तान्येव विस्तारः तद्गोचर्म निगद्यते ॥६४॥

आदित्यो वरुणो विष्णुर्ब्रह्मा सोमो हुताशनः ।
शूलपाणिश्च भगवानभिनन्दति भूमिदम् ॥६५॥

भूमिं यः प्रतिगृह्णाति यश्च भूमिं प्रयच्छति ।
उभौ तौ पुण्यकर्माणौ नियतं स्वर्गगामिनौ ॥६६॥

यस्तु दद्यान्महीं विप्रो ब्राह्मणायाग्निहोत्रिणे ।
स याति परमं स्थानं गृह्णानश्च न संशयः ॥६७॥

इक्षुभिस्सन्ततां भूमिं यवगोधूमशालिनीम् ।
यो ददाति द्विजश्रेष्ठ पुनरावर्तते न च ॥६८॥

सर्वेषां चैव देवानां सप्तजन्मानुगं फलम् ।
हाटकक्षितिगौरीणां सप्तजन्मानुगं फलम् ॥६९॥

आस्फोटयन्ति पितरः प्रवदन्ति पितामहाः ।
भूमिदोऽस्मत्कुले जातः सोऽस्मान् सन्तारयिष्यति ॥७०॥

कृष्णलाः पञ्चमानं तु माषैः षोडशभिः स्मृतम् ।
सुवर्णमेकं तद्दानं दानात्स्वर्गमवाप्नुयात् ॥७१॥

त्रीणि तुल्यप्रदानानि त्रीणि तुल्यफलानि च ।
सर्वकामदुघा धेनुः गावः पृथ्वी सरस्वती ॥७२॥

---

२४. स्व म. १०. ६४ = कृत्यकल्पतरु पृ. १८७. प. ११, १२
" " " ६५ = " " १८८ " ३, ४
" " " ६६-६८ = " " १८८. " १२-१७
" " " ६९ = " " १९०. " ४,५.
" " " ७० = " " " " १७,१८
" " " ७१ = " " १९४ " ८,९
" " " ७२ = " " २०० " ३,४.

[२५] मासभेदे दानभेदाः शस्ता एव द्विजर्षभाः ।
माघे मासि तिला(:) शस्ता(:) तिलधेनुस्तथैव च ॥७३॥

इध्माग्निभोजनं चैव दत्वा स्वर्गान्न हीयते ।
फाल्गुने बहवो गावो वस्त्रं कृष्णाजिनान्वितम् ॥७४॥

गोविन्दप्रीणनार्थाय दातव्यं द्विजसत्तमाः ।
[२६] चैत्रे विचित्रवस्त्राणि शयनान्यासनानि च ॥७५॥
विष्णोश्च प्रीतये तानि देयानि ब्राह्मणेषु च ।
गन्धमाल्यानि वैशाखे देयानि मण्डितानि[२७] च ॥ ७६ ॥
देयानि द्विजमुख्येभ्यो मधुसूदनतृप्तये ।
उदकुम्भानि धेनुं च तालवृन्तं सचन्दनम् ॥ ७७ ॥
त्रिविक्रमस्य प्रीत्यर्थं दातव्यं ज्येष्ठमासके ।
उपानद्युगलं छत्रं लवणामलकानि च ॥ ७८ ॥
आषाढे माधवप्रीत्यै दातव्यानि तु भक्तितः ।
श्रावणे मासि विप्रेन्द्र दद्यात्कनकपङ्कजम् ॥
हृषीकेशप्रीणनार्थं शरणं ( लवणं ? ) सगुडोदनम् ॥ ७९ ॥
मासि भाद्रपदे दद्यात् पायसं मधुसर्पिषी ।
माधवस्य च प्रीत्यर्थं तथा सशर्करं दधि ॥ ८० ॥

---

२५. इतः परं प्रतिमासं भिन्नानि नानादानानि । अत्र दृश्यमानः सन्दर्भः प्रायः कृत्यकल्पतरौ दान° ( पृ० २३९ ) च. चि. दान. पृ० (८८५) उदाहृतवामनपुराणवाक्यजातमनुकरोति ।

| | | | | | | | |
|---|---|---|---|---|---|---|---|
| २६. | स्व. म. १०. ७३$_{३,४}$ | = | कृत्यकल्पतरु | पृ. | २३९ | प. | ६, ७. |
| | ” ” ” ७४$_{३,४}$ | = | ” | ” | ” | ” | ८ |
| | ” ” ” ७५ | = | ” | ” | ” | ” | ९, १०. |
| | ” ” १०. ७६ | = | ” | ” | २३९. | ” | ११, १२ |
| | ” ” ” ७७,७८$_{१,२}$ | = | ” | ” | ” | ” | १३-१८ |
| | ” ” ” ७९$_{५,६}$ | = | ” | ” | २४० | ” | ४. |
| | ” ” ” ८०$_{१,२}$ | = | ” | ” | ” | ” | ५. |

२७. अलङ्करणानीति अर्थः स्यात् । उदाहृतवामनवाक्येषु अस्य पदस्य छाया नास्ति ।

प्रीत्यर्थं पद्मनाभस्य देयमाश्वयुजेन वै ।
रजतं कनकं दीपं मणिमुक्ताफलादिकम्[२८] ॥८१॥

दातव्यं केशवप्रीत्यै कार्तिके मासि भो द्विजाः ।
शाल्यन्नं च गुडान्नं च पिष्टकान्नं गुडान्वितम् ।
दातव्यं केशवप्रीत्यै मार्गशीर्षेण वै सदा ॥८२॥

दासीदासमलङ्कारपट्टवस्त्राणि यानि च ।
इन्धनानि सुगन्धीनि दद्यात्पौष्ये प्रयत्नतः ॥८३॥

इति स्वल्पमत्स्ये.........दानप्रकरणे
दशमोऽध्यायः

---

२८. स्व. म १०. ८१, ८२$_{१,२}$ = कृत्यकल्पतरु पृ. २४० प. ६, ७, ८.
" " " ८२$_{५,६}$ = " " " " १०
" " " ८३$_{१,२}$ = " " " " १३.

# विष्णुपुराणविषयसूची

## मध्वाचार्य आद्य

[This subject-index of the Viṣṇu-Purāṇa is based on the Gītā-Press edition of this Purāṇa. The adhyāya-concordance of this edition with the two other editions—viz. of Jīvānanda and Veṅkaṭeśvara Press—has also been given here by the author for the facility of reference. According to our scheme of the Subject-Concordance of the Purāṇas, the present Viṣṇu-Purāṇa index has been divided into the ten major sections, called *Khaṇḍas*, which cover almost all the topics dealt with in this Purāṇa.

Below is given in English a brief Khaṇḍa-wise summary of this Sanskrit subject-index of the Viṣṇu-Purāṇa :

### I Khaṇḍa

**Sarga (creation) and Pratisarga (Dissolution of the universe).**

1. *Sarga* (Creation)—

Three kinds of creation—(1) *Prākṛta* (Elemental) by Viṣṇu, (2) *Dainandinīya* (Ephemeral) by Brahmā at the end of each *Pralaya* (Brahmā's Night) and (3) *Nitya* (Constant) by Dakṣa and other Prajāpatis; the definition and details of these three kinds of creation ; Viṣṇu as the creator, preserver and destroyer ; the rescue of the earth by Viṣṇu-Varāha ; mental creation by Brahmā ; the creation of Rudra, Asuras, Gandharvas Nāgas, Yakṣas, Rākṣasas, Pitṛs Devas, men, goats, cows, Chandas-s Yajñas etc. from various limbs and bodies (*tanu-s*) of Brahmā ; the nine mind-born sons of Brahmā—Bhṛgu etc., called nine Brahmās,—the creation of eleven Rudras by Rudra ; the creation by

Svāyambhuva Manu, by Dakṣa, by Dharma, by Adharma and by Kaśyapa; Soma, Pṛthu etc. anointed in sovereignty by Brahmā and the sages.

2. *Pratisarga or Pralaya* (Dissolution)—

*Pralaya* also called here as *Pratisaṁcara*; four kinds—*Prākṛta* (Elemental), *Naimittika* (Occessional), *Ātyantika* (Absolute) and *Nitya*, (Perpetual); their definitions and detailed description.

### II Khaṇḍa

### Tīrthas, Bhūgola and Bhuvanakośa

1. *Tīrthas* (Places of pilgrimage)—

No separate chapter on tīrthas; only Aśvatīrtha, Piṇḍāraka tīrtha, Puruṣottama tīrtha, and Śālagrāma tīrtha are mentioned.

2. *Bhūgola* (Geography)—

Names of mountains, hills, rivers, forests, places (cities, villages etc.) given alphabetically.

3. *Bhuvana-kośa*—

Seven Dvīpas (Continents), Seven Samudras (Oceans) surrounding the Dvīpas, Lokāloka mountain, Meru mountain, Aṇḍakaṭāha; the extent of the earth; Varṣas (countries), Varṣa-parvatas (i.e. mountains separating varṣas from each other), Kula-parvatas (mountain ranges) of each Dvīpa; Rivers rising from these Parvatas.

The 9th Dvīpas (or Divisions) of Bhārata Varṣa, mountains, rivers, and Janapadas of Bhārata Varṣa.

Brahmāṇḍa, its position, and expanse.

Jyotiṣa (astronomy) connected with the Bhuvanakośa—Kāla (time), Ayanas, Heavenly Gaṅgā, Dhruva star; Śiśu-māra cakra as a form of Viṣṇu, Dhruva residing in its tail; Saptarṣis; Nine

planets, their chariots and horses; Bālakhilyas; all planets and stars tied to Dhruva with the rays of the Pravaha Vāyu.

The battle of the Mandeha Rākṣasas with the sun at the time of its rising, their destruction by *arghyadāna* and *sandhyopāsana*.

The rains and its cause.

### III KHAṆḌA

### Śāstras, Vidyās and Kalās (Various sciences and arts)

Vedas, their Śākhās; the propounders of the Śakhās of the four Vedas, the five divisions of the Atharvaveda, original Purāṇa Saṃhitās, eighteen Purāṇas (Mahā-Purāṇas) and their names, Upapurāṇas mentioned as such without names, Viṣṇu Purāṇa and the tradition of its transmission; Āyurveda, and its divisions into eight aṅgas by Dhanvantari.

### IV KHAṆḌA

### Philosophy, Religion and Religious Sects

The Ārhata (Jain) and the Bauddha religions propagated by Māyāmoha among the Asuras, by which they gave up the Vedic Dharma, and were consequently defeated by the gods; knowledge of the Self, and of the God; the nature of Brahman and the Ātman; Pain, its nature, the means of its destruction; Praṇava (the syllable 'Om'); devotion and the devotee; Yoga, its definition and aṅgas (mentioned in the Khāṇḍikya-Keśidhvaja Saṁvāda), pleasure and bliss, its nature.

### V KHAṆḌA

### Ācāra (Performance of good and enjoined actions), and Karma-Kāṇḍa (Performance of religious rites)

The duties of the four Āśramas and the Varṇas; worship, Govardhana worship, Indra-worship by the

Gopas or cow-herds, Viṣṇu-worship ; Yajñas, Śrāddhas, Aṣṭakā Śrāddha, Shrāddha performed by Ikṣvāku ; fruits of actions.

## VI KHAṆḌA

### Kāla, Yuga, Manvantara, Kalpa

The nature and glorification of *Kāla* (time) ; the period called the day of Brahmā, and of Viṣṇu ; *Kāla* as the form of Viṣṇu.

Divisions of *Kāla* (*Nimeṣa* etc.) ; *Kalpa* ; the period of life of Brahmā called *para*, half of this period is called *parārdha.*

*Yuga-s*—Kṛta etc., Viṣṇu as Kapila in Kṛta, Cakravartin in Tretā, Veda-Vyāsa in Dvāpara, and Kalki at the end of Kali-Yuga. The four Tithis called Yugādyās (i. e. falling in the beginning of the four respective Yugas).

Seven Sages of every Yuga.

Kaliyuga, its nature and its special importance. Manvantaras, the past and future Manus, the Avatāras of Viṣṇu in each Manvantara, Devas, Ṛṣis and the sons of Manu of each Manvantara ; the division of Vedas by Vyāsa in each Dvāpara ; the names of 28 past Veda-Vyāsas.

Kalpa, and its period. Pādma Kalpa, Vārāha Kalpa,

Enumeration of the numbers from one to *parārdha* mentioned in the context of the *Prākṛta Pralaya*

## VII KHAṆḌA

### Saṁvādas, Stutis, Nītis, Gāthās etc.

1. *Saṁvāda-s* (Conversations or dialogues)—arranged alphabetically according to the names of the speakers.

2. *Stuti-s* (Eulogies of gods)–arranged alphabetically according to the names of gods eulogised, names of the corresponding eulogisers also given.

3. *Nīti-s* (wise sayings, or statements of practical wisdom)—as given in the conversation of Pṛthu and Pṛthivī, of Prahlāda and Hiraṇya Kaśipu.

4. *Gāthā-s*—Ślokas sung by Pitṛs, by Pṛthivī and by Yama, respectively called as the *Pitṛ-gāthā*, *Pṛthvī-gāthā* and the *Yama-gāṭhā*.

5. *Upadeśa-s* (Instructions)—by Ṛbhu to Nidāgha, by Prahlāda to Daityas and to Hiraṇya Kaśipu, by Jaḍa Bharata to King Sauvīra, by Marīci and other sages to Dhruva, by Vasiṣṭha to Parāśara, by Sunīti to her son Dhruva.

## VIII Khaṇḍa

### Vaṁśa and Vaṁśānucarita

Royal genealogies (arranged alphabetically)—Solar and Lunar dynasties, Ikṣvāku dynasty (Solar), Lunar dynasties of Kuru, Kroṣṭhin, Turvasu, Druhya, Nimi, Pūru, Magadha dynasties, Yadu dynasty, Vaivasvata Manu dynasty.

*Carita-s* narrated with descriptions of the genealogies : Names of the chief characters alphabetically arranged, e.g. Akrūra, Ajamīḍha, Aṇuha, Aditi, Anamitra etc.

## IX Khaṇḍa

### Classes and Individuals, and Caritas and Ākhyānas belonging to them :

*Classes* (Names of classes alphabetically arranged)—Apsaras-s, Asuras, Ṛṣis, Gandharvas, Dānavas, Devas, various classes of the Devas ; Devāsura-Yuddha (Wars between the Devas and the Asuras) ; Daityas, Nāgas, Niṣādas, Piśācas, Manuṣyas, Yakṣas, Rākṣasas, Sarpas.

*Individuals*—Names (both males and females) of Kings, Gods, Asuras etc., alphabetically arranged.

X KHAṆḌA

**Nirvacanas (Etymologies), Lakṣaṇas (Definitions) Gaṇanās (Enumerations) Varṇanas (Descriptions) etc.**

*Etymologies* (alphabetically arranged)—of Ānakadundubhi, Amāvaśyā, Ārhata, Gandharva, Govinda, Janaka, Dāmodara, Naimittika, Taittirīya, Nārāyaṇa, Putra, Pṛthivī, Pravaha (a kind of wind), Prācīna-Barhis, Brahmā, Bhagavān, Bharadvāja, Madhuvana, Marut, Mātrā, Rājā, Yoga, Rudra, Vāsudeva, Viṣṇu, Śāntanu, Saṁkarṣaṇa.

*Enumerations*—Agnis (3), Ādityas (12), Oṣadhis (17), Kula-Parvatas of Bhārata (7), Chandas-s (7), etc.

The references to the Aṁśas, Adhyāyas and the Ślokas where these topics are dealt with in the Purāṇa are given by the author in the Sanskrit-Index].

## विष्णुपुराणस्य मुद्रितसंस्करणानाम् अध्यायादि-संवादः

(Concordance of the Adhyāyas etc. of the Printed Editions of the Viṣṇu-Purāṇa)

| गीताप्रेस-संस्करण (गोरखपुर) | वेंकटेश्वरप्रेस-संस्करण (मुम्बई) | जीवानन्द-संस्करण (कलकत्ता) |
|---|---|---|
| ४।२।१-१२८ | गी. प्रे.वत् | ४।२।१-१२८ |
| ४।२।१२९-१३३ | „ | ४।३।१-४ |
| ५।३२।१-३० | „ | अत्र गी. प्रे. श्लोकाः २०-२१, २७-२९ २६ उत्तरार्धं, ३० पूर्वार्धं च न सन्ति |
| ५।३३।१-५२ | „ | ५।३३।१-५० ; अत्र गी. प्रे. श्लोकाः ४८ उत्तरार्धं, ४९, ५०, न सन्ति |
| ५।३३।५२ | „ | नास्ति |

**शेषं त्रिषु संस्करणेषु समानम्**

---

### व्यवहृतसंकेतविवरणम्

(Explanation of the symbols and abbreviations used)

१. अत्र प्रथमः स्थूलः अङ्कः अंशस्य ज्ञापकः, द्वितीयः स्थूलः अङ्कः अध्यायस्य ज्ञापकः, सूक्ष्माः अङ्काः श्लोकसंख्याज्ञापकाः ।

२. ( ) एतादृशे कोष्ठके उपात्तविषयस्य पुराणमनुसृत्य प्रासंगिकं विवरणं दत्तम् ।

३. [ ] „ „ पाठान्तरादिविषयस्य विवेचनं कृतम् ।

४. — इति 'डैस' चिह्नं विषयानुवृत्तिज्ञापकम् ।

५. द्र. = द्रष्टव्यम् ।

[ अस्यां विषयसूच्यां स्थलनिर्देशाः गीताप्रेस (गोरखपुर) मुद्रित-विष्णुपुराणानुसारेण प्रदत्ताः सन्ति ]

# विष्णुपुराणविषयसूची

## प्रथमः खण्डः, सर्ग-प्रतिसर्गौ ( सृष्टिस्थितिप्रलयाः )


( १ ) विभागः सर्गः

सृष्टिः [ सामान्या ]

—इयं ( १ ) प्राकृता, ( २ ) दैनन्दिनी, ( ३ ) नित्या चेति त्रिविधा, त्रिविधसृष्टीनां लक्षणानि च १।७।४४–४५
—प्राकृतसृष्ट्याः हेतुः विष्णुः १।२।२७–७०
—दैनन्दिन्याः सृष्ट्याः हेतुः ब्रह्मा १।४।५०–७।१६
—नित्यसृष्ट्याः हेतवः प्रजापतयः १।७।३७
—प्राकृतवैकृताद्याः नव सृष्ट्यो जगतो मूलहेतवः १।५।२५–२६

( १ ) प्राकृता सृष्टिः

—अण्डस्वरूपम्, अण्डस्यावरकाणि १।२।५८–६०
—चतुर्मुखब्रह्मसृष्टिः १।२।५४–५७
—विष्णुकृता, अव्यक्तादिक्रमेण ब्रह्माण्डसृष्टिः १।२।१–५३
—विष्णुः सृष्टिस्थितिलयकर्तेति विशदरूपेण कथनम् १।२।६१–७०
—सृष्टेर्निमित्तकारणं विष्णुरेव १।४।५०–५२ [ द्र. ७।४७–४८ ]
—प्राकृतसर्गः त्रिविधः—महतः सर्गः, भूतसर्गः, ऐन्द्रियकश्चेति १।५।१९–२१
—वराहकर्तृकपृथिव्युद्धरणभूविभागादयः १।४।१-४६

( २ ) दैनन्दिनी सृष्टिः

( क ) संक्षेपेण सृष्टिनिरूपणम्

—ब्रह्मकर्तृका, सम्बद्धविषयेण सह [ द्र. १।२।५४–५७ ] १।३।१–२८
—ब्रह्मकर्तृका मानसी सृष्टिः ( अविद्यादि-कुमारान्ता ) १।५।१–२६
—दैनन्दिनसर्गः द्विविधः—वैकृतः, प्राकृतवैकृतश्चेति ( तत्र वैकृतः पञ्चविधः—( १ ) मुख्यसर्गः ( २ ) तिर्यक्स्रोताः ( ३ ) देवसर्गः ( ४ ) मानुषसर्गः ( ५ ) अनुग्रहसर्गः, प्राकृतवैकृतः ( १ ) कौमारः ( ब्रह्मविष्णुकर्तृकः ) १।५।२१–२५

( ख ) विस्तारेण सर्गनिरूपणम् १।५।३०–७।१७

—ब्रह्मकर्तृकः शारीरः सर्गः ( असुर-देव-पितृ-मनुष्याणाम्, एषां सृष्टौ पूर्वपूर्वशरीरत्यागः, त्यक्तशरीराणां स्वरूपादि-कथनम् १।५।३०–४१

—अजानामुत्पत्तिः, ब्रह्मणो मुखात् १।५।४८

—अविद्यानां ( पञ्चानां ) प्रादुर्भावो ब्रह्मणस्सकाशात् १।५।४–६

—अवीनामुत्पत्तिः, ब्रह्मणो वक्षसः १।५।४८

—असुराणामुत्पत्तिः, ब्रह्मणो जघनात् ( एते रात्रौ बलिनः, बलकारणं च ) १।५।३१–३२

—अहीनामुत्पत्तिः, ब्रह्मणः केशानां नीचैः पतनात् १।५।४४–४५

—कामस्योत्पत्ति, ब्रह्मणः क्षुधया १।५।४१

—क्षुधाया उत्पत्तिः, ब्रह्मणः रजोमात्रात्मिकया तन्वा १।५।४१

—क्षेत्रज्ञानामुत्पत्तिः, ब्रह्मणः गात्रेभ्यः १।७।१–३

—गन्धर्वाणामुत्पत्तिः, गायतः ब्रह्मणोऽङ्गात्, निर्वचनं च १।५।४६–४७

—गवामुत्पत्तिः, ब्रह्मणः उदरात् पार्श्वाभ्यां च १।५।४६
[ द्र. १।५।५१–५३ ]

—छन्दसामुत्पत्तिः, ब्रह्मणो मुखेभ्यः १।५।५४–५७

—पितॄणामुत्पत्तिः, ब्रह्मणश्शरीरात् ( एते संध्यायां बलिनः, बलकारणं च ) १।५।३५–३६
[ द्र. १।२१।२७–२६ ]

—प्रजाः ब्रह्मणः मानसाः ( ताः सुराद्याः स्थावरान्ताश्चतुर्विधाः ) १।५।२८–२९
[ द्र. १।६।११–१४ ]

—ब्रह्मणस्तनवः, ( आभ्य असुरादीनामुत्पत्तिः, आसां स्वरूपं, नामानि च ) १।५।२६–४०
[ द्र. ४१–४५ ]

—ब्राह्मणादीनां लोककल्पनम् [ प्राजापत्यं ब्राह्मणानाम्, ऐन्द्रं क्षत्रियाणाम्, मारुतं वैश्यानाम्, गान्धर्वं शूद्रजातीनामित्यादिरूपेण १।६।३४–४०

—भूतानामुत्पत्तिः क्रुद्धाद् ब्रह्मणः सकाशात् ( एते क्रोधात्मानः ) १।५।४५–४६

—भृग्वादयः ब्रह्मणो मानसाः पुत्राः ( एते नव ब्रह्माणः, एषां पत्न्यः ख्यात्यादयः ) १।७।४–८

—मनुः ब्रह्मपुत्रः ( स्वायंभुवः, शतरूपाऽस्य पत्नी, अस्य संततिश्च) १।७।१६–१९

—मनुष्याणामुत्पत्तिः, ब्रह्मणः रजोमात्रात्मिकया तन्वा
( तनुस्वरूपम्, मनुष्याः प्रातःसंध्यायां बलिनः, बलकारणं च ) १।५।३७–३९

—यक्षाणामुत्पत्तिः, ब्रह्मणः सकाशात्
( यक्षाणां स्वरूपम्, निर्वचनं च ) १।५।४२–४३

—यज्ञानामुत्पत्तिः, ब्रह्मणः मुखेभ्यः १।५।५४–५७
[ द्र. १।६।८, २७–३१ ]

—राक्षसानामुत्पत्तिः, क्रुद्धाद् ब्रह्मणः सकाशात्
( एषां स्वरूपम्, निर्वचनं च ) १।५।४१–४३

—रुद्रस्योत्पत्तिः, क्रुद्धाद् ब्रह्मणः ललाटात् ( अर्धनारीवपुः,
ब्रह्मण आदेशेन आत्मानं स्त्रीपुरुषभेदेन द्विधा
विभजनम्, पुनः पुरुषमेकादशधा, स्त्रियं च
बहुधा विभजनम् ) १।७।१०–१५

—नीललोहितरुद्रोत्पत्तिः, ब्रह्मणोऽङ्के, ( अस्य सप्त नामानि,
अष्ट स्त्रियः, अष्ट स्थानानि च ) १।८।१–१४

—रुद्रोत्पत्तिः, एकादशरुद्रनामानि १।१५।१२२–१२५

—वयसा [ = पक्षिणा ] मुत्पत्तिः ब्रह्मणो वयसः १।५।४८

—वर्णानामुत्पत्तिः, ब्रह्मणो मुखादिभ्यः १।६।३–६

—वेदानां प्रादुर्भावो ब्रह्मणः पूर्वादिमुखेभ्यः १।५।५४-५७

—सनकादीनामुत्पत्तिः, ब्रह्मणः सकाशात् ( एते लोकसृष्टौ
निरपेक्षाः, रुद्रसृष्टौ निमित्तीभूताः ) १।७।८–११

—सर्पाणामुत्पत्तिः, ब्रह्मणः केशसर्पणात्, निर्वचनं च १।५।४४–४५

—सुराणामुत्पत्तिः, ब्रह्मणो मुखात् ( एते सत्त्वप्रधानाः,
दिवा बलिनः, बलकारणं च ) १।५।३३–३४

( ३ )[1] नित्यसृष्टिः

( प्रजापतिकर्तृका ) ( अध्यायानुक्रमेण )

( मन्वादयः नित्यसर्गस्य हेतवः ) १।७।३७

रुद्रकृता सृष्टिः

—एकादश रुद्राणाम्, सौम्यादीनां स्त्रीणां च १।७।१३–३५

स्वायम्भुवमनुकृता सृष्टिः

—प्रियव्रतोत्तानपादाकूतिप्रसूतीनाम् १।७।१६–१९

दक्षकृता सृष्टिः

—श्रद्धादिचतुर्विंशतिकन्यानाम् १।७।२२–२५

---

१—नवमखण्डे भृग्वादिकर्तृका सृष्टिः भृग्वादिनामभिस्सह द्रष्टव्या

धर्मकृता सृष्टिः
— कामादीनां पुत्राणाम्  १।७।२८–३१
अधर्मकृता सृष्टिः
—अनृतादीनां पुत्राणाम्  १।७।३२–३६
प्राचेतसदक्षकृता मानसी सृष्टिः
—देवादीनाम्  १।१५।८७–८८
प्राचेतसदक्षेण पत्न्यां असिक्न्यां कृता सृष्टिः
— षट्सहस्रपुत्राणाम्, षष्टिकन्यानां च  १।१५।८९–१०३
कश्यपकृता सृष्टिः ( स्वारोचिषमन्वन्तरे )
—आदित्यानाम्  १।१५।१२६–१३४
—दैत्यानाम्  १।१५।१४१–१४३
—दानवानाम्  १।२१।४–१४
—पौलोमादीनाम्  १।२१।७–९
—तिरश्चाम्  १।२१।१४–१७
—गरुडारुणयोः  १।२१।१७
—सर्पाणाम्  १।२१।१८–१९
—नागानाम्  १।२१।१९–२१
—पिशाचादीनाम्  १।२१।२२–२३
—उद्भिदाम्  १।२१।२४
—यक्षाणाम्  १।२१।२५
—रक्षसाम्  १।२१।२५
—अप्सरसाम्  १।२१।२५
—गन्धर्वाणाम्  १।२१।२५
(२) विभाग :—स्थितिः
—विष्णुकर्तृका ( सम्बद्धविषयेण सह )  १।२।६१–७०
—मन्वादयो नित्यस्थितिकारिणः  १।७।३८
आधिपत्याभिषेचनम्
—सोमादीनाम् ( ब्रह्म-महर्षिकृतम् )  १।२२।१–१५

( ३ ) विभाग :—प्रतिसर्गः[ = प्रलयः]
प्रतिसर्गप्रकरणम् [प्रतिसञ्चरोऽयम् ६।३।३ ; नैमित्तिकादित्रिविध-
प्रलयविवरणमत्र ; मध्ये कलियुगधर्मादिविवरणम्,
खाण्डिक्य-केशिध्वजयोर्योगविषयकसंवादश्च ]  ६।१।१–८।१

प्रतिसर्गपर्यायाः

—उपसंहारः ६।१।७

—उपसंहृतिः ६।१।२, ६।२।४१

—प्रतिसञ्चरः १।२।२५, १।३।२२, ६।३।१, ६।८।१,

—प्रतिसर्गः ६।८।२

—महाप्रलयः ६।१।२

—लयः ६।३।१

[ द्र. १।२।२३-२५, २।५।१९, २।८।९८-९९ ]

प्रतिसञ्चरः

—सः त्रिविधः—नैमित्तिक-प्राकृत-आत्यन्तिकभेदात् ६।३।१

—( १ ) नैमित्तिकः ( चतुर्युगसहस्रान्ते कल्पे ब्रह्मकर्तृकः, अनावृष्टि-सूर्यातप-संवर्त्तकवायु-संवर्त्तकमेघ-एकार्णवावस्थादिविवरणम् ) ६।३।१२-४।११

—( २ ) प्राकृतः ( महदादिविशेषक्षयात्मकः, परार्धद्वितये गते सति भवत्ययम्, पृथिव्यादितत्त्वानां संहरणम् - प्रकृति—पुरुषयोः परमात्मनि लयः, विष्णोः माहात्म्यम्, अस्य लक्षणम्, कारणञ्च ६।४।१३ ) ६।४।११-५०

[ द्र. ६।३।२-३ ]

—( ३ ) आत्यन्तिकः ( ज्ञानात् योगिनः आत्मनि लयः ) १।७।४३

( मोक्षाख्यः ) ६।३।२

( अस्य ज्ञानवैराग्ये साधने ) ६।५।१

( आत्यन्तिकप्रसङ्गे आध्यात्मिकादितापत्रयवर्णनम्, गर्भजादिदुःखकथनम्, तत्कारणविवरणम्, भगवत्प्राप्तिः आध्यात्मिकदुःखनाशहेतुरिति कथनम् ) ६।५।२-६१

( विष्ण्वाख्ये निर्मले ब्रह्मणि लयः ) ६।७।१०४

प्रलयः

—नैमित्तिकप्राकृतिकात्यन्तिकनित्यानां चतुर्विधप्रलयानां विवरणम् १।७।४१-४३

## द्वितीयः खण्डः ( तीर्थ-भूगोल-भुवनकोशाः )

( १ ) विभागः—तीर्थम् ( तीर्थप्रकरणं पृथक् नास्त्यत्र )

तीर्थविशेषाः

—अश्वतीर्थम् ( श्यामकर्णानामश्वानामुत्पत्तिस्थानम् ) ४।७।१५

